गान । समाख्यावाक्यप्रकरणस्थाना...

हेतुगर्भाप्रतिज्ञाकेवलापि । सिद्धोप्रतिज्ञायांहेतुमात्रंच । दृष्टांतःसप्रतिज्ञोहेतुगर्भः । उपपत्तिदोषौविरोधासं
गती । न्यूनाधिकेवाचनिके । संवादानुक्तियुतानिग्रहाः । प्रत्यक्षंसप्तविधं । साक्षिषडिंद्रियभेदेन । मानसप्रत्य
क्षजास्मृतिः । स्मृत्यनुवादयोर्नाप्रामाण्यं । यथार्थत्वानुभवात् । अहानेश्च । विरोधोमानस्ववाक्याभ्यां । स्व
वाक्यविरोधोपसिद्धांतजातिरूपेण । जातिर्नमेयेमानापेक्षेत्यादिका । मेयेमानापेक्षास्तीतिचतेनैवन्यायेन
सिद्धत्वात् । मानविरोधश्च । छलमसंगतं । अन्यच्च । गृष्टिविवक्षयागामानयेत्युक्तेपृथिवीविवक्षयागवानयनम
शक्यमितिवत् । त्रिविधोविरोधः । प्रतिज्ञाहेतुदृष्टांतभेदेन । प्रमाणविरुद्धार्थप्रतिज्ञाप्रतिज्ञाविरोधः । हेतुस्व
रूपासिद्धिरव्याप्तिश्चेतिहेतुविरोधः । साध्यस्यसाधनस्यवाऽननुगमोदृष्टांतविरोधः । प्रतिज्ञायाःसमबलविरोध
एवसप्रतिसाधनः । सएवोपाधिदोषोपि । सर्वएतेदृश्यत्वानुमानेद्रष्टव्याः । प्रत्यक्षागमादिभिर्जगतःसत्यत्वात्
तत्पक्षेदृश्यत्वस्यचमिथ्यात्वात् । अनिर्वचनीयस्यप्रतिवादिनोसिद्धत्वात् । आत्मनोपिदृश्यत्वात् । शुक्तिर
जतादेरनिर्वचनीयत्वाभावात् । अनिर्वचनीयदृश्यत्वाभावात् । मानसिद्धत्वादितिसप्रतिसाधनत्वाच्च ।
जगत्सत्यत्वग्राहिप्रत्यक्षस्यवर्तमानमात्रग्राहित्वेअनुमानागमप्रामाण्यग्राहिणोपिप्रत्यक्षत्वाविशेषादुत्तरक्षणे

प्रामाण्यंनसेत्स्यतीतिभेदादिवाक्यानामेवप्रामाण्यंस्यात् । तस्यसाक्षिसिद्धत्वंचेज्जगत्सत्यत्वमपिसाक्षिसि लक्षणं.
द्धं । व्यभिचारश्चेदागमार्थानुमानिर्दोषत्वाध्यवसायेचसमः । अतउत्तरदिवसेऽभेदवाक्यस्यभेदोर्थःस्यात् ।
निर्दोषानुमायाःसदोषत्वं । सदोषानुमायानिर्दोषत्वं । इत्यव्यवस्था ।आश्रयसाध्यव्यधिकरणासिद्धयोनदूषणं
। अतिप्रसंगाभावात् । अतिप्रसंगेनहिदोषत्वादोषत्वेकल्प्ये । व्याप्तिरेवहिप्रयोजिका । असत्यपिव्याप्तिरस्त्ये
व ।असदाश्रयस्यसाधकत्वंनेत्यपिव्याप्तिंविनाकथंनिवार्यते । असदाश्रयमित्यादिविशेषणत्वसंभवेकथमव्या
प्तिः । नचात्यंताभावोपिसर्वधर्मरहितः । प्रमेयत्वाद्यनुभवात् । परिशेषार्थापत्तिप्रामाण्याभ्युपगमाच्च । विमतं
सकर्तृकमित्यत्रसर्वज्ञत्वस्यपक्षधर्मताबलेनसिध्यंगीकारात् । परिशेषोर्थापत्तिरनुमानमित्यविशेषः । उपप
त्तिमात्रत्वात् । उपपत्तेश्चव्याप्त्यपेक्षासर्वथांगीकार्येत्याग्रहमात्रेणभेदः । उपमानस्यापिव्याप्तिरूपत्वात् । नहि
स्वसदृशेनासदृशंक्वचिद्दृष्टं । योग्यानुपलब्धेश्चलिंगत्वं । अविशेषात् । उक्तदोषेष्वेवाशेषानुमानदोषाणामंत
र्भावः । साध्याविशिष्टोसिद्धः । सिद्धसाधकोसंगतः । नप्रमासाधनंप्रमाणं । ज्ञानव्यतिरिक्तप्रमायांप्रमा ॥२३६॥
णाभावात् । नचाज्ञातपरिच्छित्तिरेवप्रमेत्यत्रकिंचिन्मानं ।याथार्थ्यमेवप्रामाण्यमित्यंगीकारात् ।नचानुभूतिरे

वप्रमाणं । स्मृत्यादावव्याप्तेः।वेदानुमानादिप्रामाण्यप्रसिद्धेश्च । स्मृतिःप्रत्यक्षमैतिह्यमनुमानंचतुष्टयं । प्रमाण मितिविज्ञेयंधर्माद्यर्थेबुभूषुभिरितिश्रुतेश्च । ऐतिह्यमागमभेदः । नचसम्यगनुभवसाधनंप्रमाणं । ईश्वरज्ञाना दावव्याप्तेः । अप्रामाण्येप्रमाणाभावाच्च । प्रामाण्यज्ञानेच । तत्राप्यंगीकारेऽनवस्थितेः । स्वप्रकाशात्मांगी कारेतत्राव्याप्तेः । स्मृतेश्चप्रामाण्यानंगीकारेअनुभूतंमयेत्यत्रप्रमाणाभावात् । लिंगत्वेनप्रामाण्येकल्पनागौ रवं । दृष्टहानिश्च । स्मृतिप्रमाणद्वैविध्यमात्रकल्पनेमिथ्याज्ञानादेर्निराकरणादनुभवविरोधः । तदनुभवाभाव इत्युक्तेअनुभवःस्मृतिश्चनास्तीत्युक्तेकिमुत्तरं । स्वसिद्धेःसाधनंपरसिद्धेर्दूषणं । अतोनदूषणेअपसिद्धांतादि । इष्टापत्तिःसिद्धसाधनत्वादसंगतमेव । आनंदतीर्थमुनिनाब्रह्मतर्कोक्तमार्गतः । मानंलक्षणमित्युक्तंसंक्षेपा द्ब्रह्मसिद्धये । अशेषमानमेयैकसाक्षिणेऽक्षयमूर्तये । अजेशपुरुहूतेड्यनमोनारायणायते ॥ ॥ इतिश्रीम दानंदतीर्थभगवत्पादाचार्यविरचितंप्रमाणलक्षणंसंपूर्णं ॥ ॥छ॥ ॥छ॥

कथा ॥१॥

श्रीमद्धनुमद्भीममध्वातर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॥ ॐ ॥ नृसिंहमखिलाज्ञानति लक्षणं·
मिराशिशिरद्युतिं । संप्रणम्यप्रवक्ष्यामिकथालक्षणमंजसा । वादोजल्पोवितंडेतित्रिविधाविदुषांकथा । तत्त्व
निर्णयमुद्दिश्यकेवलंगुरुशिष्ययोः । कथान्येषामपिसतांवादोवासमितेःशुभा । ख्यात्याद्यर्थंस्पर्धयावासतांज
ल्पइतीर्यते । वितंडातुसतामन्यैस्तत्त्वमेषुनिगूहितं । स्वयंवाप्राश्निकैर्वादेचिंतयेत्तत्त्वनिर्णयं ।रागद्वेषविहीना
स्तुसर्वविद्याविशारदाः । प्राश्निकाइतिविज्ञेयाविषमाएकएववा । अशेषसंशयच्छेत्तानिःसंशयउदारधीः । ए
कश्चेत्प्राश्निकोज्ञेयःसर्वदोषविवर्जितः ।एकोवाबहवोवास्युर्विष्णुभक्तिपरास्सदा । विष्णुभक्तिर्हिसर्वेषांसद्गुणा
नांस्वलक्षणं । पृष्टेनागमएवादौवक्तव्यःसाध्यसिद्धये । नैषातर्केणापनेयामतिरित्याहहिश्रुतिः । अन्यार्थए
वागमस्यवक्तव्यःप्रतिवादिना।ऋग्यजुःसामाथर्वाश्चभारतंपंचरात्रकं।मूलरामायणंचैवसंप्रोच्यंतेसदागमाः।
अनुकूलायएतेषांतेचप्रोक्तास्सदागमाः ।अन्येदुरागमानामतैर्नसाध्यंहिसाध्यते । स्वपक्षआगमश्चैववक्तव्यः ॥२३७॥
प्रतिवादिना । तस्याप्यन्यार्थतासाध्यावादिनास्वार्थसिद्धये । अन्यार्थतानिराकार्यास्वागमस्यविनिश्चयात् ।
उपपत्त्यवकाशोत्रह्यागमार्थविनिर्णये । वाद्यागमार्थेनिर्णीतआगमार्थःपरस्यतु । निर्णेयःसहितैःपश्चात्ततोनि

श्शेषनिर्णयः। प्रत्यक्षसिद्धेष्वर्थेषुप्रश्नेमामक्षजंवदेत्। ज्ञानंवाज्ञानसिद्धेषुनानुमांप्रथमंवदेत्। परतुष्टिकरंवाक्यं
वदेतांयदिवादिनौ। सएवात्रागमोज्ञेयःपरतुष्टिर्हितत्फलं। एवंनिर्णयपर्यंतंवादेसुबहवोपिहि। घटेयुश्चिरका
लंचजल्पेयावत्परोजितः। तत्त्वनिर्णयवैलोम्यंवादेसाक्षात्पराजयः। संवादेश्लाघ्यतैवस्याद्गुरुत्वमितरस्यच।
तत्त्वनिर्णयवैलोम्येनिंद्योदंड्योथवाभवेत्। विरोधासंगतिन्यूनतूष्णींभावादिकैर्जितः। भवेज्जल्पेवितंडायां
न्यायोजल्पवदीरितः। संवादेदंड्यतानस्याद्वितंडाजल्पयोरपि। पराजितत्वमात्रंस्यान्निंद्योदंड्योपिवान्य
था। अनुवादादिराहित्यंनैवजल्पेपिदूषणं। विद्याहीनत्वलिंगेपिवादिनोःस्यात्पराजयः। तदभावान्नैवषट्का
दन्योनिग्रहइष्यते। अंतर्भावादिहान्येषांनिग्रहाणामितिस्मह। विद्यापरीक्षापूर्वैववृत्तिर्जल्पवितंडयोः। स्ख
लितत्वादिमात्रेणनतत्रापिपराजयः। वादजल्पवितंडानामितिशुद्धंस्वलक्षणं। आनंदतीर्थमुनिनाब्रह्मत
र्कानुसारतः। कथालक्षणमित्युक्तंप्रीत्यर्थंशार्ङ्गधन्वनः। सदोदितामितज्ञानपूरवारितहृत्तमाः। नरसिंहःप्रिय
तमःप्रीयतांपुरुषोत्तमः॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितंकथालक्षणंसंपूर्णं॥ ॥ध॥

उपाधि० श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॥ ॐ ॥ नारायणोगण्यगुणनि
॥ १ ॥ त्यैकनिलयाकृतिः । अशेषदोषरहितःप्रीयतांकमलालयः । अज्ञाताखिलसंवेत्तुर्घटतेनकुतश्चन । उपाधिभेदा खंडनं.
द्घटतइतिचेत्सस्वभावतः । अज्ञानतोवाद्वैतस्यसत्यतास्वतएवचेत् । अनवस्थितिरज्ञानहेतौवान्योन्यसिद्धि
ता । चक्रकापत्तिरथवाभेदश्चोपाधितःकुतः । विद्यमानस्यभेदस्यज्ञापकोनैवकारकः ।उपाधिर्दृष्टपूर्वोहिखेपिदे
शांतरस्यसः । ज्ञापकोविद्यमानस्यमूढबुद्धिव्यपेक्षया । नचेदुपाधिसंबंधएकदेशेथसर्वगः । एकदेशेऽनवस्था
स्यात्सर्वगश्चेन्नभेदकः । सुखदुःखादिभोगश्चस्वरूपैक्येनभेदतः । दृश्योह्युपाधिभेदेपिहस्तपादादिगोयथा ।
नानादेहगभोगानुसंधानंयोगिनोयथा ।नचेद्भोगानुसंधानंतदिच्छायोगिनःकुतः ।अनुसंधानरहितदेहबाहु
ल्यमन्यथा । सिद्धमेवहितत्पक्षेविशेषोयोगिनःकुतः । सिद्धौहिकर्मभेदस्यस्यादुपाधिविभिन्नता । तत्सिद्धौचै
वतत्सिद्धिरित्यन्योन्यव्यपाश्रयः । आत्मस्वभावभेदस्याविदोषत्वेनचाखिलः । प्रत्यक्षादिविरोधाच्चदुष्टःपक्षोय
मंजसा । चेष्टालिंगेनसात्मत्वेपरदेहस्यसाधिते । अन्यत्वंस्वात्मनस्तस्मात्सर्वैरेवानुभूयते । अज्ञाताचाल्पशक्ति ॥२३८॥
त्वंदुःखित्वंस्वल्पकर्तृता ।सर्वज्ञतादीशगुणविरुद्धाह्यनुभूतिगाः ।सार्वज्ञादिगुणाविष्णोःश्रुतिषुप्रतिपादिताः ।

सत्यःसोऽस्यमहिमेत्यादिवाक्यान्मृषानच । नचवेदोक्तमिथ्यात्वेमानंतन्मानतापिन । अतोज्ञासंभवादेव
नाधिकार्यैक्यवादिनां । अतोनाज्ञातमितिचविषयोविषयांतरे । अज्ञाभावात्फलंकस्ययोगःशशनृशृंगयोः।दु
र्घटत्वंभूषणंचेत्स्यादविद्यात्वमात्मनः । अंधंतमोप्यलंकारोनित्यदुःखंशिरोमणिः । अतःपरोमात्रयेतिपूर्वंश्रु
तिनिदर्शितः ।अन्यमीशमितिश्रुत्याभिन्नजीवदृशंगतः । भिन्नत्वेनात्मसादृश्यदोयदेतिश्रुतेःसदा । मायावा
दतमोव्याप्तमितितत्त्वदृशाजगत् । भातंसर्वज्ञसूर्येणप्रीतयेश्रीपतेःसदा । नमोऽमंदनिजानंदसांद्रसुंदरमूर्तये।
इंदिरापतयेनित्यानंदभोजनदायिने।।।।इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितमुपाधिखंडनंसंपूर्णं ।।
।।छ।।छ।।छ।।श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ।।।।ॐ।।नरसिंहोखि
लाज्ञानमतध्वांतदिवाकरः। जयत्यमितसज्ज्ञानसुखशक्तिपयोनिधिः । विमतमनारंभणीयंअन्यथाप्रतिपाद
कत्वात्यदित्थंतत्तथायथासंप्रतिपन्नं । नहिब्रह्मात्मैक्यस्ययाथार्थ्यंतत्पक्षे । अद्वैतहानेःस्वरूपातिरेके। अन
तिरेकेस्वप्रकाशत्वादात्मनःसिद्धसाधनता। निर्विशेषत्वात्मनोनानधिगतोविशेषः । सिद्धत्वात्स्वरूपस्यविशे
षाभावाच्चनाज्ञानंकस्यचिदावरकं । अनधिगतार्थगंतृप्रमाणमितिचतन्मतं । अज्ञानासंभवादेवतन्मतमखि

लमपाकृतं। मिथ्यात्वेचैक्यस्यातत्त्वावेदकत्वमागमस्यस्यात्। सत्यताचभेदस्य।एवमेवप्रयोजनमपिनिरस्तं।
स्वरूपत्वान्मोक्षस्यपूर्वमेवसिद्धत्वात्।अज्ञानासंभवेनचतुर्थप्रकाराभावात्पंचमप्रकारतापिनिरस्ता। विषयप्र
योजनाभावादेवाधिकारीच। तदभावादेवसंबंधोपि। द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच। क्षरःसर्वाणिभू
तानिकूटस्थोक्षरउच्यते॥ उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः। योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरः। य
स्मात्क्षरमतीतोहमक्षरादपिचोत्तमः। अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः। योमामेवमसंमूढोजानातिपुरु
षोत्तमं। ससर्वविद्भजतिमांसर्वभावेनभारत। इतिगुह्यतमंशास्त्रमिदमुक्तंमयानघ। एतद्बुद्ध्वाबुद्धिमान्स्यात्कृ
तकृत्यश्चभारत। इंद्रियेभ्यःपराह्यर्थाअर्थेभ्यश्चपरंमनः। मनसस्तुपराबुद्धिर्बुद्धेरात्मामहान्परः। महतःपरम
व्यक्तमव्यक्तात्पुरुषःपरः। पुरुषान्नपरंकिंचित्साकाष्ठासापरागतिः। भूम्नःक्रतुवज्ज्यायस्त्वंतथाचदर्शयति। इ
तिविष्णोःपुरुषोत्तमत्वमेवसर्वशास्त्रार्थत्वेनभगवताश्रुत्याचाभिहितं। इतिसर्वज्ञमुनिनामायावादतमोखि
लं। निरस्तंतत्त्ववादेनसतांसंशयनुत्तये। नास्तिनारायणसमंनभूतंनभविष्यति। एतेनसत्यवाक्येनसर्वार्था
न्साधयाम्यहं॥ ॥इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितमायावादखंडनंसंपूर्णं॥ ॥ ७ ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः॥ ॥ॐ॥ विमतंमिथ्यादृश्यत्वाद्य
दित्थंतत्तथायथासंप्रतिपन्नं।इत्युक्तेजगतोऽभावादाश्रयासिद्धः पक्षः। अनिर्वचनीयासिद्धेरप्रसिद्धविशेषणः।
सदसद्वैलक्षण्येमिथ्यात्वेसिद्धसाधनता। दृश्यत्वाभावादसिद्धोहेतुः। अनिर्वचनीयासिद्धेरेव। अनिर्वचनीया
सिद्धेरेवसपक्षाभावाद्विरुद्धः।आत्मनोपिदृश्यत्वादनैकांतिकः। जगतोभावेऽनुमानस्याप्यभावइतितर्कबाधि
तत्वेनानध्यवसितः। प्रत्यक्षादिविरुद्धत्वाद्विश्वंसत्यमित्यादिवाक्यविरुद्धत्वाच्चकालात्ययापदिष्टः। रजतंदृ
ष्टमितिभ्रममात्रत्वात्विमतंसत्यंदृश्यत्वादात्मवदित्यपिप्रयोज्यत्वात्प्रकरणसमः। विमतंसत्यंप्रमाणदृष्टत्वाद्य
दित्थंतत्तथायथात्मेतिप्रयोगात्सत्प्रतिसाधनः।शुक्तिरजतस्याप्यनिर्वचनीयत्वाभावात्साध्यविकलोदृष्टांतः।
उक्तप्रकारेणदृश्यत्वाभावात्साधनविकलश्च। प्रमाणविरुद्धत्वमुपाधिः। साध्यधर्मविशिष्टःपक्षः। साध्यस
मानधर्मविशिष्टःसपक्षः। साध्यविपरीतधर्मविशिष्टोविपक्षः। पक्षवचनंप्रतिज्ञा। लिंगंहेतुः। निदर्शनं
दृष्टांतः। योदृश्यतेसदानंदनित्यव्यक्तचिदात्मना। निर्दोषाखिलकल्याणगुणंवंदेरमापतिं॥ ॥इतिश्री
मदानंदतीर्थभगवत्पादाचार्यविरचितंप्रपंचमिथ्यात्वानुमानखंडनंसंपूर्णं॥छ॥ ॥छ॥ ॥छ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॥ ॐ ॥ स्वतंत्रमस्वतंत्रंचद्वि
विधंतत्त्वमिष्यते । स्वतंत्रोभगवान्विष्णुर्भावाभावौद्विधेतरत् । प्राक्प्रध्वंससदात्वेनत्रिविधोऽभावइष्यते ।
चेतनाचेतनत्वेनभावोपिद्विविधोमतः । दुःखस्पृष्टंतदस्पृष्टमितिद्वेधैवचेतनं । नित्यादुःखारमाऽन्येतुस्पृष्ट
दुःखास्समस्तशः । स्पृष्टदुःखाविमुक्ताश्चदुःखसंस्थाइतिद्विधा । दुःखसंस्थामुक्तियोग्याअयोग्याइतिच
द्विधा । देवर्षिपितृपनराइतिमुक्तास्तुपंचधा । एवंविमुक्तियोग्याश्चतमोगाःसृतिसंस्थिताः । इतिद्विधामु
क्त्ययोग्यादैत्यरक्षःपिशाचकाः । मर्त्याधमाश्चतुर्धैवतमोयोग्याःप्रकीर्तिताः । तेचप्राप्तांधतमसःसृतिसंस्था
इतिद्विधा । नित्यानित्यविभागेनत्रिधैवाचेतनंमतं । नित्यावेदाःपुराणाद्याःकालःप्रकृतिरेवच । नित्यानि
त्यंत्रिधाप्रोक्तमनित्यंद्विविधंमतं । असंसृष्टंचसंसृष्टमसंसृष्टंमहानहं । बुद्धिर्मनःखानिदशमात्राभूतानिपंच
च । संसृष्टमंडंतद्गंचसमस्तंसंप्रकीर्तितं । सृष्टिःस्थितिःसंहृतिश्चनियमोऽज्ञानबोधने । बंधोमोक्षःसुखंदुःख
मावृतिर्ज्योतिरेवच । विष्णुनास्यसमस्तस्यसमासव्यासयोगतः ॥ ॥ इतिश्रीमदानंदतीर्थभगवत्पादा ॥२४०॥
चार्यविरचितंतत्त्वसंख्यानंसंपूर्णं ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॥ॐ ॥ स्वतंत्रंपरतंत्रंचप्रमेयं
द्विविधंमतं। स्वतंत्रोभगवान्विष्णुर्निर्दोषाखिलसद्गुणः। द्विविधंपरतंत्रंचभावोऽभावइतीरितः। पूर्वापरसदा
त्वेनत्रिविधोऽभावइष्यते। भावाभावस्वरूपत्वान्नान्योन्याभावतापृथक्। चेतनोचेतनश्चेतिभावश्चद्विविधः
स्मृतः। नित्यमुक्तश्चसृतियुक्परतंत्रोपिचेतनः। द्विधैवश्रीर्नित्यमुक्तासृतियुक्तद्विधामतः। मुक्तोऽमुक्तइ
तिह्यत्रब्रह्मांताउत्तरोत्तरं। मुक्ताःशतगुणाःप्रोक्तारमातेभ्योखिलैर्गुणैः। नित्यंबहुगुणोद्रिक्तातततोनंतगुणोहरिः।
अमुक्तास्त्रिविधास्तत्रनीचमध्योच्चभेदतः। मुक्तियोग्यास्तत्रचोच्चानित्यावर्तास्तुमध्यमाः। नीचानित्यतमो
योग्याद्विधैवाचेतनंमतं। नित्यानित्यत्वभेदेनदेशःकालःश्रुतिस्तथा। भूतेंद्रियप्राणगुणसूक्ष्मरूपंचनित्यकं।
एषांविकारोऽनित्यःस्यान्नित्याएवहिचेतनाः। गुणक्रियाजातिपूर्वाधर्माःसर्वेपिवस्तुनः। रूपमेवद्विधंतच्चयाव
द्वस्तुचखंडितं। खंडितेभेदऐक्यंचयावद्वस्तुनभेदवत्। खंडितंरूपमेवात्रविकारोपिविकारिणः। कार्यकारण
योश्चैवतथैवगुणतद्वतोः। क्रियाक्रियावतोस्तद्वत्तथाजातिविशेषयोः। विशिष्टशुद्धयोश्चैवतथैवांशांशिनोरपि।
यएतत्परतंत्रंतुसर्वमेवहरेःसदा। वशमित्येवजानातिसंसारान्मुच्यतेहिसः॥ इतितत्त्वविवेकःसंपूर्णः॥ ७॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः॥॥ॐ॥सर्वत्राखिलसच्छक्तिःस्वतं
त्रोशेषदर्शनः।नित्यातादृशचिच्चेत्ययंतेष्टोनोरमापतिः॥विमतोभिन्नोमुक्तत्वाद्यदित्थंतत्तथायथासंप्रतिपन्नः।
नचभेदेविकल्पोयुज्यते। अनिर्वचनीयस्यसर्वत्राप्रसिद्धत्वादेव। शशविषाणंगोविषाणंवोच्यतइतिवत्। नचा
निर्वचनीयेकिंचिन्मानं।मिथ्याशब्दोऽनिर्वचनीयंवदतीत्यत्रच। अनुमानस्यचाप्रसिद्धविशेषणःपक्षः। नचधू
मत्ववन्मिथ्यात्वमित्युभयसंप्रतिपन्नंसामान्यमस्ति। नचबाष्पारोपितधूमेनधूमवत्त्वंव्यभिचरति।नचभावाभा
वविलक्षणंक्वचिदागमोवक्ति। नासदासीन्नोसदासीत्तदानींनासीद्रजोनोव्योमापरोयदित्यत्रच।पारिशेष्येणा
निर्वचनीयत्वांगीकारेआनीदवातंस्वधयातदेकमितितदानींपरिशिष्टत्वाद्ब्रह्मणएवानिर्वचनीयत्वंस्यात्।मूर्तं
सदितिसंप्रोक्तममूर्तमसदुच्यते। मूर्तामूर्तेतरद्ब्रह्मनसत्तन्नासदुच्यतइतिपैंगिश्रुतिः।यदन्यद्वायोश्चांतरिक्षाच्चै
तत्सदितिमाध्यंदिनश्रुतिः।अद्भुतत्वादनिर्वाच्यंब्रह्मचिच्चेत्यमेवच। अचिंत्यंततएवैतदतर्क्याज्ञेयमेवच। ऋग
ताविति धातोस्तुपूर्वावगतवत्सदा।स्थितेर्ब्रह्मर्तमित्युक्तमनृतंपरिणामतः।प्रकृतिप्राकृतंप्रोक्तमसत्तदशुभत्वतः
। असतांबुद्धिगम्यत्वादसत्यमितिचोच्यते। नियमेनबहिश्चित्तास्तेसंतोब्रह्मणिस्थिताः। विश्वंसत्यंवशेविष्णो

असतीबुद्धिगम्यत्वादसत्यमितिचोच्यते। नियमेन...

र्नित्यमेवप्रवाहतः। नह्यप्यनीदृशंविश्वंतत्तत्कालानुसारत[illegible]प्रतिष्ठंयेजगदाहुरनीश्वरं।तआसुराःस्व
यंनष्टाजगतःक्षयकारिणइत्यादिव्याससूक्तौ। असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरं।अपरस्परसंभूतंकिमन्यत्का
महैतुकं। एतांदृष्टिमवष्टभ्यनष्टात्मानोल्पबुद्धयः।प्रभवंत्युग्रकर्माणःक्षयायजगतोऽहिताइत्यादिचगीतासु। वि
श्वंसत्यंमघवानायुवोरिदापश्चनप्रमिनंतिव्रतंवां। प्रघान्वस्यमहतोमहानिसत्यासत्यस्यकरणानिवोचं। सत्यः
सोअस्यमहिमागृणेशवोयज्ञेषुविप्रराज्ये। कविर्मनीषीपरिभूःस्वयंभूर्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीभ्यःस
माभ्यइत्यादिश्रुतिभ्यश्च। नचार्थापत्त्याऽनिर्वचनीयसिद्धिः। असतःप्रतीतिंविनाऽसद्वैलक्षण्यज्ञानानुपपत्तेः।
नचबाध्यंजगदित्यत्रकिंचिन्मानं। बाध्यत्वमपिहितेषांमिथ्या। तस्यचमिथ्यात्वेऽबाध्यत्वमेवसत्यंस्यात्।
सद्विलक्षणत्वंचसज्जातिविलक्षणत्वंसन्मात्रविलक्षणत्वंवा। जात्यंगीकारेसद्बहुत्वं। सन्मात्रविलक्षणत्वंचेत्सि
द्धसाधनता। ब्रह्मवैलक्षण्यांगीकारात्। नचकयापियुक्त्यामानेनवाभेदनिराकरणंभवति। अंगीक्रियमाण
त्वात्। अनिर्वचनीयासिद्धेश्च। सद्विलक्षणत्वमसद्विलक्षणत्वंचमिथ्येत्यविलक्षणत्वमेवसत्यंस्यात्। एवमेवहे
त्वादिष्वपिविकल्पोनिराकरणीयः। दृश्यत्वाद्यनुमानेष्वप्येतएवदोषाः। आत्मनोपिदृश्यत्वादनैकांतिकता

च। नचात्मनोदृक्कर्मत्वंविनातज्ज्ञानत्वं। तदज्ञाननिवृत्तिश्चतेनभवति। नचतदाकारं। अतद्विषयत्वादेव। तद्विषयत्वमेवहितदाकारत्वं। नहिज्ञानज्ञेययोरेकाकारता। नह्यज्ञानस्यघटाश्रयत्वंब्रह्माश्रयत्वंवास्ति। पुंगतमेवहितमः। ज्ञानेननिवर्तते। विषयाश्रयंचेदज्ञानंनिवर्ततेतर्ह्येकेनज्ञातस्यघटस्यान्यैरज्ञातत्वंनस्यात्। अतद्विषयज्ञानेनतदज्ञाननिवृत्तौघटज्ञानेनापिनिवर्तेत। अविषयत्वादेवतस्यज्ञानत्वंनस्याद्घटवत्। जडत्वंचाप्रमातृत्वमेव। नचप्रमातृत्वमात्मनस्तैरंगीक्रियते। अतस्तदप्यनैकांतिकं। मिथ्याप्रमातृत्वंचानिर्वचनीयनिरासादेवनिरस्तं। यदिजडत्वंनामाप्रकाशत्वंतदप्यात्मनःस्वविषयप्रकाशत्वाभावात्परविषयप्रकाशत्वाभावाच्चानैकांतिकमेव। स्वविषयत्वंहिकर्तृकर्मविरोधात्तैर्नांगीक्रियते। मिथ्याभूतपरविषयत्वंचानिर्वचनीयनिरासादेवनिरस्तं। विषयवर्जितःप्रकाशएवनभवतिघटवत्। तत्प्रमाणाभावात्। देशतःकालतःपरिच्छिन्नत्वंप्रकृतिकालादिष्वभावाद्भागासिद्धं। वस्तुतःपरिच्छिन्नत्वमात्मनोपिभेदांगीकारादनैकांतिकं। प्रत्यक्षबाधितंचजगन्मिथ्यात्वं। सदितिप्रतीयमानत्वात्। नचप्रत्यक्षसिद्धमन्येनकेनापिबाध्यंदृष्टं। चंद्रप्रादेशत्वादिविषयंतुदूरस्थत्वादिदोषयुक्तत्वादपटु। नचजगत्प्रत्यक्षस्यापटुत्वेकिंचिन्मानं। नचजगतोऽज्ञानजन्यत्वेकिंचिन्मानं। नच

मायाविनामायादृश्यतेविश्वमीश्वरः। सदापश्यतितेनेदंनमायेत्यवधार्यतां। अपरोक्षदृशोमिथ्यादर्शनंनक
चिद्भवेत्। सर्वापरोक्षविद्विष्णुर्विश्वदृक्तन्नतन्मृषेतिब्रह्मांडे। ईशोनीशोजगन्मिथ्यानपूज्योगुरुरित्यपि। एक
आत्मापरब्रह्मभावोमुक्तिरितिह्यपि। एवमादिविरुद्धानिवचनान्यथयुक्तयः। प्रमाणैर्बहुभिर्ज्ञेयाआभासाइति
वैदिकैः। वेदवेदानुसारेषुविरोधेन्यार्थकल्पना। इतराणिविरुद्धानिप्रलंभभ्रमजान्यपीतिव्यासस्मृतिः। ॐनास
तोदृष्टत्वात्। नाभावउपलब्धेः। वैधर्म्याच्चनस्वप्नादिवदित्यादिभगवद्वचनेनापिनिरस्ताः। नचशून्यवादिनःस
काशाद्वैलक्षण्यंमायावादिनः। व्यावहारिकसत्त्वस्यतेनाप्यंगीक्रियमाणत्वात्। सत्यंतुद्विविधप्रोक्तंसांवृतंपार
मार्थिकं। सांवृतंव्यावहार्यंस्यान्निवृत्तौपारमार्थिकं। विचार्यमाणेनोसत्त्वंसत्त्वंचापिप्रतीयते। यस्यतत्सांवृतंज्ञे
यंव्यवहारपदंचयदित्यादिना। नचनिर्विशेषब्रह्मवादिनःशून्यात्कश्चिद्विशेषस्तस्य। निर्विशेषंस्वयंभातंनिर्लेप
मजरामरं। शून्यंतत्त्वमविज्ञेयंमनोवाचामगोचरं। जाड्यसंवृतिदुःखांतपूर्वदोषविरोधियत्। नित्यभावन
याभातंतद्भावंयोगिनंनयेत्। भावार्थप्रतियोगित्वंभावत्वंवानतत्त्वतः। विश्वाकारंचसंवृत्यायस्यतत्पदमक्षय
मित्यादितद्वचः। अनृतजडविरोधिरूपमंतत्रयमलबंधनदुःखताविरुद्धमितिचमायावादी। नास्यसत्त्वमस

त्त्वंवानदोषगुणएववा। हेयोपादेयरहितंतच्छून्यंपदमक्षयमितिचशून्यवादी। सत्त्वादयोधर्माःपरमार्थतोमा
यावादिनापिनांगीक्रियंते। सर्वविशेषविनिर्मुक्तत्वांगीकारात्। अवाच्यंसर्वशब्दैस्तल्लक्ष्यतेचाखिलैःपदैः।
अज्ञेयंज्ञानलक्ष्यंचतच्छून्यंपदमक्षयमितिचशून्यवादी। नचाखंडत्वेनकश्चिद्विशेषः। यदखंडपदंलक्ष्यंसर्वैर
पिविशेषणैः। सर्वैर्विशेषणैर्मुक्तंतच्छून्यंपदमक्षयमितिचशून्यवादी। एवमेवमायावादिराद्धांतः। नचमायावा
दिनोभावत्वंनामधर्मः। नचशून्यवादिनाशून्यत्वंनामधर्मः। मंय्यनंतगुणेनंतेगुणतोनंतविग्रहे। यदासीत्तत
एवाद्यःस्वयंभूःसमभूदजः। उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः। योलोकत्रयमाविश्यबिभर्त्यव्ययईश्वरइति
भगवद्राद्धांतः। परास्यशक्तिर्विविधैवश्रूयतेस्वाभाविकीज्ञानबलक्रियाचेत्यादिश्रुतिः। प्रकृष्टप्रकाशश्चंद्रइत्या
दिषुप्रकृष्टत्वादिविशेषणानिसंत्येवेतिनतत्साम्यं। अनित्यदेशकालसंबंधित्वस्यसत्त्वान्नसोयंदेवदत्तइत्याद्युप
माच। देवदत्तादिस्वरूपमात्रस्यसिद्धत्वान्नस्वरूपमात्रेप्रश्नः। नक्षत्रादिव्यतिरेकमात्रस्यापिसिद्धत्वान्नव्यतिरे
कमात्रे। अन्यथाप्रश्नस्यैवासंभवात्। अतःकैर्विशेषणैर्विशिष्टइतिप्रश्नेप्रकृष्टप्रकाशतद्देशकालादिविशिष्टएववा
क्यार्थः। अंगीक्रियमाणत्वाद्विशिष्टादेरनिर्वचनीयाभावाच्चसत्यत्वंचासिद्धं। दृष्टस्यवस्तुनोबलवद्दृष्टिंविनानान्य

द्बाधकमितिदुर्घटत्वेसुघटत्वेवानानिर्वचनीयसिद्धिः । सर्ववैलक्षण्यांगीकाराद्दुर्घटमपिब्रह्मप्रमाणादंगीक्रिय
तएवजगतोभिन्नमभिन्नंभिन्नाभिन्नंवेत्यादिविकल्पस्तत्रापियुज्यते । भिन्नंचेद्भेदादिविशिष्टाच्छुद्धंभिन्नमभि
न्नंवेत्याद्यनवस्था । अभिन्नंचेन्मिथ्यारूपेणजगताब्रह्मापिमिथ्यैवस्यात् । भिन्नाभिन्नंचेद्दोषद्वयमपि । उभयवि
लक्षणंचेदनिर्वचनीयत्वंब्रह्मणएवापतितं । यद्येवमपिनानिर्वचनीयत्वंब्रह्मणस्तर्हिजगतोपिनस्यात् । विश्वंस
त्यमित्यादिवचनमत्राप्युक्तं । नसत्तन्नासदुच्यते । असद्वाइदमग्रआसीत् । नासदासीन्नोसदासीदित्यादिब्रह्म
णोपिमिथ्यात्वेप्रमाणमस्ति । नहिदृष्टेर्बलवत्किंचित्प्रमाणं । नहियुक्तिपराजितोपिक्षुधितोनान्नमत्ति । बलव
दृष्टचबाधे । नचान्नत्वेदुर्घटेतस्यानन्नत्वंभवति । दृष्टचबाधितदृष्टस्य । नचान्नानन्नवैलक्षण्यमनुभूयते । नचत
थाव्यवहारः । नचतत्रकिंचिन्मानं । अतोविशिष्टादिनिराकरणयुक्तीनामपिविशिष्टाद्यपेक्षत्वाज्जात्युत्तरमिति
नयुक्तिबाधापि । अतोनिखिलगुणगणाढ्यमेवब्रह्मश्रुत्यभिप्रेतं । अनिर्वचनीयासिद्धेरेवानुमानस्याप्यसि
द्धिः । यदिजगन्मिथ्यास्यात्तदादृश्यत्वाद्यनुमानस्यापिजगदंतःपातित्वेनमिथ्यात्वादसिद्धिःस्यात् । वाचा
रंभणंविविधप्रकारःनामधेयंनित्यंधार्यंनामसृत्तिकेत्यादिवैदिकमेव । अनित्यत्वात्सांकेतिकंनामाप्रधानंनि

त्यत्वान्मृत्तिकादिनामैवप्रधानं । प्रधानज्ञानादप्रधानंज्ञातार्थमिवभवति । एवंप्रधानस्यपरमात्मनोज्ञानादप्रधानंज्ञातमिवभवति । प्राधान्यज्ञापनार्थमेवसृष्ट्यादिकथनं । यथासोम्येत्याद्यपिसादृश्यकथनं । नचैकनखनिकृंतनविकारःसर्वंकार्ष्णायसं । प्रधानपुरुषज्ञानाद्ग्रामोज्ञातइतिव्यपदेशोस्ति । नहिसत्यज्ञानेनमिथ्याज्ञानंभवति । मुक्तामुक्तयोर्भेदाभावेमुक्तस्यसंसारःसंसारिणोवामुक्तत्वंस्यात् । यद्यज्ञानकृतोभेदस्तर्हीश्वरस्याज्ञानाभावात्संसारिणैक्यंतेनानुभूयेत । ततश्चदुःखित्वंस्यात् । तान्यहंवेदसर्वाणिनत्वंवेत्थपरंतप । सुखंदुःखंभवोभावोभयंचाभयमेवच । अहिंसासमतातुष्टिस्तपोदानंयशोऽयशः । भवंतिभावाभूतानांमत्तएवपृथग्विधाः । यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः । अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः । इत्यादिनेश्वरेणापिभेदस्यैवानुभूयमानत्वाच्च । ततएवाभ्रांतत्वान्नमुक्तस्यापिभेदनिवृत्तिः । नचोपाधिभेदमात्रेणेश्वरस्यदुःखाभावः । हस्तपादाद्युपाधिभेदेपिभोक्तुरेकत्वानुभवात् । उद्यतायुधदोर्दंडाःपतितस्वशिरोक्षिभिः । पश्यंतःपातयंतिस्मकबंधाअप्यरीन्युधीतिभारतवचनान्नविश्लेषाद्विशेषः । अतोऽनौपाधिकत्वादेवभेदस्यनमुक्तस्येश्वरैक्यं । इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः । सर्गेपिनोपजायंतेप्रलयेनव्यथंतिच । यदापश्यःपश्यतेरुग्मवर्णंकर्तारमीशंपुरुषंब्रह्म

योनिं। तदाविद्वान्पुण्यपापेविधूयनिरंजनःपरमंसाम्यमुपैतीत्यादिमुक्तभेदवचनेभ्यश्च।एवंप्रत्यक्षानुमानाग
मविरुद्धत्वादभेदविषयवत्प्रतीयमानान्यपिवाक्यानिसादृश्याद्यर्थान्येवयोजनीयानि। विरुद्धवत्प्रतीयंतआ
गमायत्रवैमिथः। तत्रदृष्टानुसारेणतेषामर्थोन्ववेक्ष्यतइतिब्राह्मवचनाच्च। भेदाद्यनुभवस्यभ्रांतित्वांगीकारेत
दपलापयुक्तेर्नितरांभ्रांतित्वाद्भेदाद्यनुभवस्याभ्रांतित्वमेवभवति।परस्परविरुद्धयोरन्यतरनिषेधस्यान्यतरवि
धिनांतरीयकत्वात्। एकजीववादपक्षेतन्निष्ठानांमृत्यनंतरमपिविश्वस्यानिवृत्तत्वाद्भेदनिष्ठएवैकजीवइत्याप
तति। तस्यचतत्रैवाग्रहान्नकदाचिद्भेदनिवृत्तिरित्यनिवृत्तिरेवभवति। नचैकजीवाज्ञानपरिकल्पितास्समस्ता
इत्यत्रकिंचिन्मानं। अतोमुक्तेभ्योप्यन्यएवसमस्तगुणपरिपूर्णोभगवान्विष्णुरितिसिद्धं॥ ब्रह्मेशानादिभि
र्देवैर्यत्प्राप्तुंनैवशक्यते। तद्यत्स्वभावःकैवल्यंसभवान्केवलोहरे। परोमात्रयातन्वावृधाननतेमहित्वमन्वश्नुवं
ति। सत्यचिच्चेत्यपतयेमुक्तामुक्तोत्तमायते। नमोनारायणायार्यवृंददवंदितपद्धय॥ आनंदतीर्थपुंसिंहोमाया
वादिदितेःसुतान्। विदार्ययुक्तिनखैररप्रतीपोविभासते॥ १॥ पलायध्वंपलायध्वंत्वरयामायिदानवाः।
सर्वज्ञहरिरायातितर्कागमदरारिभृत्॥२॥ द्रवतद्रवताशुमायिनःप्रविशध्वमतंद्रितागुहाः। कमलारमणांबरा

श्रयःसमुदेत्यखिलज्ञभास्करः ॥३॥ नृहरिःसकलज्ञनामकःसमुपैतिहिमायिदानवान् । प्रपलायनमत्रतत्क्षमं त्वरयावोवसतिर्गुहासुच ॥४॥ जयत्यानंदतीर्थेष्टदेवतानरकेसरी । विपाटिताज्ञानतमःकपाटात्युरुहुंकृतः ॥५॥ जयत्यमितपौरुषःस्वजनतेष्टचिंतामणिः । अजेशमुखवंदितोगुणगणार्णवःश्रीपतिः ॥६॥ सर्वज्ञसन्मुनींद्रोच्चसन्मनःपंकजालयः । अजितोजयतिश्रीशोरमाबाहुलताश्रयः ॥७॥ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितस्तत्वोद्योतःसंपूर्णः ॥ ॥ ॥ ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ कर्मनिर्णयटीकोक्तानिऋग्वेद
ब्राह्मणचतुर्थपंचिकाद्याध्यायादिमखंडानिलिख्यंते॥ ॐदेवावैप्रथमेनाह्नेंद्रायवज्रंसमभरंस्तंद्वितीयेनाह्नासिं
चंस्तंतृतीयेनाह्नाप्रायच्छंस्तंचतुर्थेहन्प्राहरत्तस्माच्चतुर्थेहन्षोळशिनंशंसतिवज्रोवाएषयत्षोळशीतद्यच्चतुर्थेह
न्षोळशिनंशंसतिवज्रमेवतत्प्रहरतिद्विषतेभ्रातृव्यायवधंयोस्यःस्तृत्यस्तस्मैस्तर्तवैवज्रोवैषोळशीपशवउक्था
नितंपरस्तादुक्थानांपर्यस्यशंसतितंयत्परस्तादुक्थानांपर्यस्यशंसतिवज्रेणैवतत्षोळशिनापशून्परिगच्छतित
स्मात्पशवोवज्रेणैवषोळशिनापरिगतामनुष्यानभ्युपावर्ततेतस्मादश्वोवापुरुषोवागौर्वाहस्तीवापरिगतएव
स्वयमात्मनेऽतएववाचाभिषिद्धउपावर्ततेवज्रमेवषोळशिनंपश्यन्वज्रेणैवषोळशिनापरिगतोवाग्घिवज्रोवा
क्षोळशीतदाहुःकिंषोळशिनःषोळशित्वमितिषोळशःस्तोत्राणांषोळशःशस्त्राणांषोळशभिरक्षरैरादत्तेषोळश
भिःप्रणौतिषोळशपदान्निविदंदधातितत्षोळशिनःषोळशित्वंद्वेवाअक्षरेअतिरिच्येतेषोळशिनोऽनुष्टुभमभि
संपन्नस्यवाचोवावतौस्तनौसत्यानृतेवाअवत्येनंसत्यंनैनमनृतंहिनस्तियएवंवेद॥खंडः॥ गौरिवीतंषोळशिसा
मकुर्वीततेजस्कामोब्रह्मवर्चसकामस्तेजोवैब्रह्मवर्चसंगौरिवीतंतेजस्वीब्रह्मवर्चसीभवतियएवंविद्वान्गौरिवीतं

षोळशिसामकुरुतेनानदंषोळशिसामकर्तव्यमित्याहुरिंद्रोवैवृत्रायवज्रमुदयच्छत्तमस्मैप्राहरत्तमभ्यहनत्सोभि
हतोव्यनदद्यद्व्यनदत्तन्नानदंसामाभवत्तन्नानदस्यनानदत्वमभ्रातृव्यंवाएतद्भ्रातृव्यहासामयन्नानदमभ्रातृव्यो
भ्रातृव्यहाभवतियएवंविद्वान्नानदंषोळशिसामकुरुतेतद्यदिनानदंकुर्युरविहृतःषोळशीशंस्तव्योविहृतासुहि
तासुस्तुवतेयदिगौरिवीतंविहृतःषोळशीशंस्तव्योविहृतासुहितासुस्तुवते॥खंडः॥अथातश्छंदांस्येवव्यतिषज
त्यात्वावहतुंहरयउपोषुशृणुहीगिरइतिगायत्रीश्चपङ्क्तीश्चव्यतिषजतिगायत्रोवैपुरुषःपाङ्क्ताःपशवःपुरुषमेवत
त्पशुभिर्व्यतिषजतिपशुषुप्रतिष्ठापयतियदुगायत्रीचपङ्क्तिश्चतेद्वेअनुष्टुभौतेनोवाचोरूपादनुष्टुभोरूपाद्वज्ररू
पान्नैतियदिंद्रपृतनाज्येऽयंतेअस्तुहर्यतइत्युष्णिहश्चबृहतीश्चव्यतिषजत्यौष्णिहोवैपुरुषोबार्हताःपशवःपुरुषमे
वतत्पशुभिर्व्यतिषजतिपशुषुप्रतिष्ठापयतियदुष्णिक्कबृहतीचतेद्वेअनुष्टुभौतेनोवाचोरूपादनुष्टुभोरूपाद्वज्ररू
पान्नैत्याधूर्ष्वस्मैब्रह्मन्वीरब्रह्मकृतिंजुषाणइतिद्विपदांचत्रिष्टुभंचव्यतिषजतिद्विपाद्वैपुरुषोवीर्यंत्रिष्टुप्पुरुषमेवत
द्वीर्येणव्यतिषजतिवीर्येप्रतिष्ठापयतितस्मात्पुरुषोवीर्येप्रतिष्ठितःसर्वेषांपशूनांवीर्यवत्तमोयदुद्विपदाचविंशत्य ॥ २४६ ॥
क्षरात्रिष्टुप्चतेद्वेअनुष्टुभौतेनोवाचोरूपादनुष्टुभोरूपाद्वज्ररूपान्नैत्येषब्रह्माप्रतेमहेविदथेशंसिषंहरीइतिद्विपदा

श्चजगतीश्चव्यतिषजतिद्विपाद्वैपुरुषोजागताःपशवःपुरुषमेवतत्पशुभिर्व्यतिषजतिपशुषुप्रतिष्ठापयतितस्मा
त्पुरुषःपशुषुप्रतिष्ठितोत्तिचैनानधिचतिष्ठतिवशेचास्ययदुद्विपदाचषोळशाक्षराजगतीचतेद्वेअनुष्टुभौतेनोवा
चोरूपादनुष्टुभोरूपाद्वज्ररूपान्नैतितिकद्रुकेषुमहिषोयवाशिरंप्रोष्वस्मैपुरोरथमित्यतिच्छंदसःशंसतिच्छंदसां
वैयोरसोत्यक्षरत्सोतिच्छंदसमभ्यत्यक्षरत्तदतिच्छंदसोतिच्छंदस्त्वंसर्वेभ्योवाएषच्छंदोभ्यस्सन्निर्मितोयत्षोळ
शीतद्यदतिच्छंदसःशंसतिसर्वेभ्यएवैनंतच्छंदोभ्यःसंनिर्मिमीतेसर्वेभ्यश्छंदोभ्यःसनिर्मितेनषोळशिनाराध्नो
तियएवंवेद ॥ खंडः ॥महानाम्नीनामुपसर्गानुपसृजत्ययंवैलोकःप्रथमामहानाम्न्यंतरिक्षलोकोद्वितीयासौलो
कस्तृतीयासर्वेभ्योवाएषलोकेभ्यस्सन्निर्मितोयत्षोळशीतद्यन्महानाम्नीनामुपसर्गानुपसृजतिसर्वेभ्यएवैनंतं
लोकेभ्यस्सन्निर्मिमीतेसर्वेभ्योलोकेभ्यस्संनिर्मितेनषोळशिनाराध्नोतियएवंवेद ॥ प्रप्रवस्त्रिष्टुभमिषमर्चतप्रा
र्चतयोव्यतीँरफाणयदितिप्रज्ञाताऽनुष्टुभः शंसंतितद्यथेहचेहचापथेनचरित्वापंथानंपर्यवेयात्तादृक्तद्यत्प्रज्ञाता
ऽनुष्टुभःशंसतिसयोव्याप्तोगतश्रीरिवमन्येताविहृतंषोळशिनंशंसयेन्नेच्छंदसांकृच्छ्रादवपद्याइत्यथयःपाप्मान
मपजिघांसुःस्याद्विहृतंषोळशिनंशंसयेद्यतिषक्तइववैपुरुषःपाप्मनाव्यतिषक्तमेवास्मैतत्पाप्मानंशमलमपहंत्य

पपाप्मानंहतेयएवंवेदोद्यद्ब्रध्नस्यविष्टपमित्युत्तमयापरिदधातिस्वर्गोवैलोकोब्रध्नस्यविष्टपंस्वर्गमेवतंलोकंयज
मानंगमयत्यपाःपूर्वेषांहरिवःसुतानामितियजतिसर्वेभ्योवाएषसवनेभ्यस्संनिर्मितोयत्षोळशीतद्यदपाःपूर्वे
षांहरिवःसुतानामितियजतिपीतवद्वैप्रातःसवनंप्रातःसवनादेवैनंतत्संनिर्मिमीतेऽथोइदंसवनंकेवलंतइति
माध्यंदिनंवैसवनंकेवलंमाध्यंदिनादेवैनंतत्सवनात्संनिर्मिमीतेममद्धिसोमंमधुमंतमिंद्रेतिमद्वद्वैतृतीयसवनंतृ
तीयसवनादेवैनंतत्संनिर्मिमीतेसत्रावृषन्जठरआवृषस्वेतिवृषण्वद्वैषोळशिनोरूपंसर्वेभ्योवाएषसवनेभ्यस्सं
निर्मितोयत्षोळशीतद्यदपाःपूर्वेषांहरिवःसुतानामितिजयतिसर्वेभ्यएवैनंतत्सवनेभ्यःसंनिर्मिमीतेसर्वेभ्यःस
वनेभ्यःसन्निर्मितेनषोळशिनाराध्नोतियएवंवेदमहानाम्नीनांपंचाक्षरानुपसर्गानुपसृजत्येकादशाक्षरेषुपादेषु
सर्वेभ्योवाएषच्छंदोभ्यःसंनिर्मितोयत्षोळशीतद्यन्महानाम्नीनांपंचाक्षरानुपसर्गानुपसृजत्येकादशाक्षरेषुपा
देषुसर्वेभ्यएवैनंतच्छंदोभ्यःसंनिर्मिमीतेसर्वेभ्यश्छंदोभ्यस्संनिर्मितेनषोळशिनाराध्नोतियएवंवेद ॥ खंडः ॥ ॥२४७॥
॥ ४ ॥ ऋग्वेदब्रह्मणचतुर्थपंचिकायांचतुर्थखंडःसंपूर्णः ॥ ॥ ७ ॥ ॥

अथैतरेयोपनिषच्चतुर्थारण्यकं ॥ ॐ ॥ विदामघवन्विदागातुमनुशंसिषोदिशः ॥ शिक्षाशचीनांपतेपूर्वीणांपु
रूवसो ॥ आभिष्ट्वमभिष्टिभिःप्रचेतनप्रचेतय ॥ इंद्रद्युम्नायनइषएवाहिशक्रः ॥ रायेवाजायवज्रिवःशविष्ठवज्रि
न्नृंजसे ॥ मंहिष्ठवज्रिन्नृंजसआयाहिपिबमत्स्व ॥ विदारायःसुवीर्यंभुवोवाजानांपतिर्वशाँअनु ॥ मंहिष्ठवज्रि
न्नृंजसेयःशविष्ठःशूराणां ॥ योमंहिष्ठोमघोनांचिकित्वोअभिनोनय ॥ इंद्रोविदेतमुस्तुषेवशीहिशक्रः ॥ तमूतयेह
वामहेजेतारमपराजितं ॥ सनःपर्षदतिद्विषःक्रतुश्छंदऋतंबृहत् ॥ इंद्रंधनस्यसातयेहवामहेजेतारमपराजितं ॥
सनःपर्षदतिद्विषःसनःपर्षदतिस्त्रिधः ॥ पूर्वस्ययत्तेअद्रिवःसुम्नआधेहिनोवसो ॥ पूर्तिःशविष्ठशस्यतईशेहिशक्रः
॥ नूनंतंनव्यंसन्यसेप्रभोजनस्यवृत्रहन् ॥ समन्येषुब्रवावहैशूरोयोगोषुगच्छतिसखासुशेवोअद्वयाः ॥ एवाह्येवे
वाह्यग्नाँ ३ इ ॥ एवाह्येवैवाहींद्रँ ॥ एवाह्येवैवाहिविष्णाँ ३ उ ॥ एवाह्येवैवाहिपूषन् ॥ एवाह्येवैवाहिदेवाः ॥ ए
वाहिशक्रोवशीहिशक्रोवशाँअनु ॥ आयोमन्यायमन्यवउपोमन्यायमन्यवे ॥ उपेहिविश्वध ॥ विदामघवन्वि
दों ३ ॥ १ ॥ इतिचतुर्थारण्यकेप्रथमोध्यायः ॥ ॥ ७ ॥ ॥ ॥
ॐ ॥ गायत्रीछंदः ॥ १ ॥ १ ॥ ३० ॥ आत्वावहंतुहरयोवृषणंसोमपीतये ॥ इंद्रत्वासूरचक्षसः ॥ इमाधाना

घृतस्नुवोहरीइहोपवक्षतः॥इंद्रंसुखतमेरथे॥इंद्रंप्रातर्हवामहइंद्रंप्रयत्यध्वरे॥इंद्रंसोमस्यपीतये॥पक्तिछंदः॥१॥
॥६॥३॥उपोषुशृणुहीगिरोमघवन्मातथाइव॥यदानःसूनृतावतःकरआदर्थयासइद्योजान्विंद्रतेहरी॥सुसंद
शंत्वावयंमघवन्वंदिषीमहि॥प्रनूनंपूर्णवंधुरःस्तुतोयाहिवशाँअनुयोजान्विंद्रतेहरी॥सघातंवृषणंरथमधितिं
ष्ठातिगोविदं॥यःपात्रंहारियोजनंपूर्णमिंद्रचिकेततियोजान्विंद्रतेहरी॥उष्णिक्छंदः॥६॥१॥५॥यदिंद्रपृतना
ज्येदेवास्त्वादधिरेपुरः॥ आदित्तेहर्यताहरीववक्षतुः॥ ६ ॥ १ ॥६॥ यदावृत्रंनदीवृतंशवसावज्रिन्नवधीः॥आ
दित्तेहर्यताहरीववक्षतुः॥यदातेविष्णुरोजसात्रीणिपदाविचक्रमे॥ आदित्तेहर्यताहरीववक्षतुः॥बृहतीछंदः॥
॥३॥३॥८॥ अयंतेअस्तुहर्यतःसोमआहरिभिस्सुतः॥ जुषाणइंद्रहरिभिर्नआगह्यातिष्ठहरितंरथं॥ हर्यन्नुषस
मर्चयःसूर्यंहर्यन्नरोचयः॥ विद्वांश्चिकित्वान्हर्यश्ववर्धसइंद्रविश्वाअभिश्रियः॥ द्यामिंद्रोहरिधायसंपृथिवींह
रिवर्पसं॥ अधारयद्धरितोर्भूरिभोजनंययोरंतर्हरिश्चरत्॥ द्विपदाऋक्॥५॥ ३॥२५॥ आधूर्ष्वस्मैदधाताश्वा
निंद्रोनवज्रीहिरण्यबाहुः॥एषब्रह्मायऋत्वियइंद्रोनामश्रुतोगृणे॥ विश्रुतयोयथापथोइंद्रत्वद्येतिरातयः॥त्वा ॥२४८॥
मिच्छवसस्पतेयंतिगिरोनसंयतः॥त्रिष्टुप्छंदः॥५॥३॥१३॥ ब्रह्मन्वीरब्रह्मकृतिंजुषाणोर्वाचीनोहरिभिर्याहितू

यं॥अस्मिन्नूषुसवनेमादयस्वोपब्रह्माणिश्रृणवइमानः॥जगतीछंदः॥८॥५॥५॥ प्रतेमहेविदथेशंसिषंहरीप्रतेव
न्वेवनुषोहर्यतंमदं॥घृतंनयोहरिभिश्चारुसेचतआत्वाविशंतुहरिवर्पसंगिरः॥हरिंहियोनिमभियेसमस्वरन्हि
न्वंतोहरीदिव्यंयथासदः॥आयंपृणंतिहरिभिर्नधेनवइंद्रायशूषंहरिवंतमर्चत॥सोअस्यवज्रोहरितोयआयसो
हरिर्निकामोहरिरागभस्त्योः॥द्युम्नीसुशिप्रोहरिमन्युसायकइंद्रेनिरूपाहरितामिमिक्षिरे॥३॥अतिछंदः॥२॥
॥६॥२८॥त्रिकद्रुकेषुमहिषोयवाशिरंतुविशुष्मस्तृपत्सोममपिबद्विष्णुनासुतंयथावशत्॥सईंममादमहिकर्म
कर्तवेमहामुरुंसैनंसश्चद्देवोदेवंसत्यमिंद्रंसत्यइंदुः॥१॥अधत्विषीमाँअभ्योजसाक्रिविंयुधाभवदारोदसीअपृण
दस्यमज्मनाप्रवावृधे॥अधत्तान्यंजठरेप्रेमरिच्यतसैनंसश्चद्देवोदेवंसत्यमिंद्रंसत्यइंदुः॥१॥ २॥साकंजातःक्रतु
नासकमोजसाववक्षिथसाकंवृद्धोवीर्यैस्सासहिर्मृधोविचर्षणिः॥दाताराधस्तुवतेकाम्यंवसुसैनंसश्चद्देवोदेवंस
त्यमिंद्रंसत्यइंदुः॥३॥वेपशक्कर्यः॥८॥७॥२१॥ प्रोष्वस्मैपुरोरथमिंद्रायशूषमर्चत॥अभीकेचिदुलोककृत्संगेस
मत्सुवृत्रहास्माकंबोधिचोदितानभंतामन्यकेषांज्याकाअधिधन्वसु॥१॥ त्वंसिंधूँरवासृजोधराचोअहन्नहिं॥
अशत्रुरिंद्रजज्ञिषेविश्वंपुष्यंतिवार्यंतंत्वापरिष्वजामहेनभंतामन्यकेषांज्याकाअधिधन्वसु॥२॥ विषुविश्वाअ

रातयोर्योनशंतनोधियः ॥अस्तासिशत्रवेवधंयोनइंद्रजिघांसतियातेरातिर्ददिर्वसुनभंतामन्यकेषांज्याकाअ
धिधन्वसु॥३॥६॥५॥५॥प्रप्रवस्त्रिष्टुभमिषंमंदद्वीरायेंदवे॥धियावोमेधसातयेपुरंध्यावि वासति ॥१॥ नदंवओ
दतीनांनदंयोयुवतीनां॥पतिंवोअघ्न्यानांधेनूनामिषुध्यसि॥२॥ताअस्यसूददोहसःसोमंश्रीणंतिपृश्नयः ॥ ज
न्मन्देवानांविशस्त्रिष्वारोचनेदिवः ॥३॥६॥५॥६॥अर्चतप्रार्चतप्रियमेधासोअर्चत॥अर्चंतुपुत्रकाउतपुरंनधृ
ष्णवर्चत॥१॥अवस्वरातिगर्गरोगोधापरिसनिष्वणत् ॥पिंगापरिचनिष्कददिंद्रायब्रह्मोद्यतं ॥२॥ आयत्पतंत्ये
न्यस्सुदुघाअनपस्फुरः॥अपस्फुरंगृभायतसोममिंद्रायपातवे॥३॥६॥५॥७॥ योव्यतीँरफाणयत्सुयुक्ताँउपदा
शुषे।तक्वोनेतातदिद्वपुरुपमायोअमुच्यत॥१॥अतीदुशक्रओहतइंद्रोविश्वाअतिद्विषः॥भिनत्कनीनओदनं
पच्यमानंपरोगिरा॥२॥अर्भकोनकुमारकोधितिष्ठन्नवंरथं॥सपक्षन्महिषंमृगंपित्रेमात्रेविभुक्रतुं ॥३॥ एतास्स
र्वाःप्रज्ञातानुष्टुभः॥६॥५॥६॥उद्यद्ब्रध्नस्यविष्टपंगृहमिंद्रश्चगन्वहि॥मध्वःपीत्वासचेवहित्रिःसप्तसख्युःपदे॥इति
त्रिःपरिदध्यात्॥८॥५॥७॥ अपाःपूर्वेषांहरिवःसुतानामथोइदंसवनंकेवलंते ॥ ममद्धिसोमंमधुमंतमिंद्रसत्रा
वृषन्जठरआवृषस्व॥ ॥ इतिऋङ्मंत्रःसंपूर्णः ॥ इतिश्रीमत्कर्मनिर्णयमूलभूतवेदभागःसंपूर्णः ॥ ७ ॥ ॥

श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ ॥ॐ॥ यइज्यतेविधीशानशक्र
पूर्वैःसदामखैः । रमाप्रणयिनेतस्मैसर्वयज्ञभुजेनमः ॥ महानाम्नीनामृचामुपसर्गायेउपसर्जनभूतास्तानुपसृज
तिसंयोजयति । महन्नामयास्वृक्षुविद्यतेतामहानाम्न्यः । परस्यब्रह्मणोयन्नामेंद्रादिकंतन्महार्थत्वान्महत् । म
हद्धितत्परंब्रह्म । अशेषगुणपूर्तेः । तत्रैकआहुरगुणंब्रह्मेति । नतद्युक्तं । श्रुतियुक्तिविरोधात् । तथाहिश्रुतिः ।
सत्यंज्ञानमनंतंब्रह्म । विज्ञानमानंदंब्रह्म । यःसर्वज्ञःसर्वविद्यस्यज्ञानमयंतपः । तस्मादेतद्ब्रह्मनामरूपमन्नंचजा
यते । दिव्योह्यमूर्तःपुरुषःसबाह्याभ्यंतरोह्यजः । अप्राणोह्यमनाःशुभ्रोह्यक्षरात्परतःपरः । एतावानस्यमहिमा
अतोज्यायांश्चपुरुषः । योनःपिताजनितायोविधाताधामानिवेदभुवनानिविश्वा । पूर्णमदःपूर्णमिदंपूर्णात्पू
र्णमुदच्यते । पूर्णस्यपूर्णमादायपूर्णमेवावशिष्यते । सर्वकर्मासर्वकामःसर्वगंधःसर्वरसःसर्वमिदमभ्यात्तोवा
क्यनादरः । विष्णोर्नुकंवीर्याणिप्रवोचंयःपार्थिवानिविममेरजांसि । परोमात्रयातन्वावृधाननतेमहित्वमन्वश्नु
वंति । नतेविष्णोजायमानोनजातोदेवमहिम्नःपरमंतमापेत्यादिका । युक्तिश्च । बुद्धिपूर्वंसर्वकर्तृत्वात्सर्वज्ञ
त्वादयोगुणायुक्ताः । कर्तृत्वात्सगुणंब्रह्मपुरुषंपुरुषर्षभमितिचभागवते । नचैकोदेवःसर्वभूतेषुगूढःसर्वव्यापीस

र्वभूतांतरात्मा।कर्माध्यक्षःसर्वभूताधिवासःसाक्षीचेताकेवलोनिर्गुणश्चेत्यादिविरोधः।सत्त्वादिगुणाभावोक्ते
स्तत्र।अन्यथैकोदेवःसर्वभूतेषुगूढइत्यादीनामपिगुणत्वात्स्वोक्तिविरोधः।नचनिर्विशेषंनामकिंचिदस्ति। नि
र्विशेषत्वोक्तेरेवव्याहतत्वात्। निर्विशेषत्वेनविशिष्टंनवेत्युक्तेयद्यविशिष्टंतर्हिनविशेषनिराकरणं। विशेषवत्त्व
मेवभवति। यदितेनविशिष्टंसएवविशेषइतिव्याहतिः। नचनिर्विशेषत्वेकिंचिन्मानं। अशेषविशेषवचनानु
भवयुक्तिविरोधश्च। नचमिथ्याविशेषवत्। व्याहतेः। मिथ्याविशेषइत्युक्तेह्यसद्विशेषइत्येवभवति। तथाच
विशेषविशिष्टपक्षोक्तदोषएव। नचानिर्वचनीयविशेषइतिभवति। अनिर्वचनीयासिद्धेः। नहितत्रप्रत्यक्षम
स्ति। मिथ्याशब्दस्त्वभाववाच्येव। तदन्यत्रप्रमाणाभावात्। नचान्यत्प्रमाणं। प्रतिज्ञाव्याहतेः। नहिसदंत
रादसतश्चान्यत्सदसद्विलक्षणंप्रसिद्धं।असन्नभवतीत्युक्तेद्वौनञौप्रकृतमर्थंसातिशयंगमयतइतिसदेवभवति।
असदंतरंवाविशेषविवक्षायां। किंचैतद्वैलक्षण्यं। भेदोऽभेदोभेदाभेदोवा। नतावद्भेदः। अनंगीकारात्। व्याव
हारिकभेदश्चानिर्वाच्यसिद्धौवक्तव्यः। नचाव्यावहारिकंकिंचित्। नचाशेषव्यवहारनिवृत्तौकिंचिन्मानं। नच
मिथ्यातथ्ययोःसामान्यंव्यावहारिकत्वंधूमबाष्पयोर्धूमत्ववत्। नचाभेदोनंगीकारादेव। तथैवोभयं। अभेदे

चानिर्वाच्यब्रह्मणोस्तच्छब्दयोःपर्यायत्वं । नचव्यावर्त्यविशेषेणापर्यायत्वंकचित् । व्यावर्त्यविशेषस्तद्यावृत्तेब्र
ह्मणिविशेषमापादयतिचेद्विशिष्टवाक्यार्थता । नचेन्नब्रह्मज्ञानार्थिनेपदांतरंवाच्यं। असंगतत्वात्। मिथ्यावि
शेषस्यचासिद्धिरुक्ता। अतोन्योन्याश्रयतानवस्थितिश्चक्रकंवा । भेदाभेदविलक्षणमप्युक्तरीत्यैवापाकृतं।किं
चासद्विलक्षणमित्यत्राभावान्यविरोधानांमध्येनञःकोर्थः। यद्यभावोन । असद्विलक्षणत्वंभावत्वमेवजगतः
स्यात्। नचसतोन्यस्मादसतोविलक्षणंजगत्। असतोन्यत्वादिधर्मानंगीकाराद्ब्रह्मणश्च । असतोऽनिर्वचनी
यत्वांगीकाराच्चनवैलक्षण्यंततोऽनिर्वाच्यस्य । तथापिचेद्वैलक्षण्यंनानिर्वचनीयत्वंजगतः । नचविरोधः । वि
रोधिनोरन्यतरनिषेधेऽन्यतरव्याप्तत्वानुभवात्।अविद्यमानंनभवतीत्युक्तेविद्यमानमित्येवहिसर्वलोकानुभवः।
अतोनंतगुणोभगवान्नारायणइतिसिद्धं।।नचसिद्धेर्थेवाक्यस्यप्रामाण्याभावादीश्वराद्यसिद्धिः।सिद्धातिरिक्त
कार्याभावात्। लिङाद्यर्थस्त्विष्टसाधनत्वमेव। नहिकर्तव्यत्वंनामेष्टसाधनत्वादन्यत्किंचित्। तन्मानाभावात्।
शब्दस्तुनतद्वक्तीत्युक्तं । लिङादेरिष्टसाधनार्थत्वेनैवकृतार्थत्वेतदन्यकार्यकल्पनेकल्पनागौरवंच । नचतत्क
ल्पकंकिंचित् । विप्रतिपत्तौचान्यन्मानंवक्तव्यंतद्भावे । नचानुमा । अप्रसिद्धविशेषणत्वात् । नचार्थापत्तिः ।

अनुपपत्त्यभावात्।कार्याभावादेवकार्यान्वयिनि[कार्यान्वयान्वयिनिवा]व्युत्पत्तिरित्यादिदूरतोनिरस्तं। का
र्यान्वितेव्युत्पत्तिरितिवदतोकार्यान्वितेव्युत्पत्तिरित्युक्तेकिमुत्तरं।अध्याहारइत्युक्तेलोपइत्युत्तरं।अशेषसिद्धप
दानामर्थलोपाल्लिङाद्यर्थमात्रलोपएवगरीयान्।हससिहसामीत्यादिसिद्धार्थएवबालानांव्युत्पत्तेः।प्रथमप्राप्त
त्वान्नतत्त्यागेकारणं।तथैवव्युत्पत्तिदर्शनाच्च।अतःसिद्धार्थेप्रामाण्यसिद्धेश्चसिद्धंमहागुणवत्त्वंविष्णोः॥ ताश्च
विदामघवन्नित्याद्याः। हेमघवन्धनवन्यशस्विन्मखपततिवा। तंवाएतंमघ[ख]वंतंसंतंमघवानित्याचक्षतेप
रोक्षेण।परोक्षप्रियाइवहिदेवाःप्रत्यक्षद्विषः।तेभिरिंद्रंचोदयदातवेमघं।तन्नआयातुमघाय।यशोवावमघं। मघ
मनुप्रापत्सि।आमामेतुमघं।मघमनुप्रापत्सि।धनंवावमघमित्यादिश्रुतिभ्यः।गातुंत्वांस्तोतुं।विदवेदयेतिसामा
न्यतोपेक्षिताशेषवेदनमुक्तातात्कालिकापेक्षितंप्रार्थयति।गातुंविदेति।त्वमेवानुशंसिषोदिशःमार्गान्।आत्म
नःस्तुतिप्रकारांस्त्वमेवोपदिशेत्यर्थः।पूर्वीणांभगवत्संप्रदायागतानांपरमविद्यानामर्थेशिक्ष। शचीनांविद्यानां
पतेवाचांपतइतिवा। पुरूवसोबहुवित्तबहुज्ञानेतिवा। बहुषुवसतिबहूनामावासइतिवा॥१॥ आभिःअभिष्टि
भिःएवंभूतैस्त्वत्पर्येषणैस्त्वत्प्रार्थनैःकंचिन्मदादिकंप्रचेतयप्रबोधय। प्रकृष्टचेतनसर्वज्ञपरमात्मन्। द्युम्नायज्ञाना

य।वित्तायय यशसेवा।इषेअन्नायचनःप्रबोधय।एतादृशोहिशक्रः। शक्रएवेतिवा।शक्तिरतिरूपत्वाच्छक्रः ॥२॥
रायेवित्ताय । वाजायअन्नाय । वज्रिणंइंद्रंवर्तयतीतिवज्रिवः । नियामकत्वेनगच्छतीतिवा । शविष्ठबलव
त्तमसुखवत्तमेतिवा । ऋंजसेप्रेरयसिसर्वान् । मंहिष्ठवज्रिन्नृंजसइत्यभ्यासस्तात्पर्यार्थः । मत्स्वमदंकुरु ॥ ३ ॥
विद्वेदयलंभयरायःसुवीर्यंच । वाजानांप्रजानांपतिर्भुवःअभवः । प्रजावैवाजइतिश्रुतेः । वशाँअनुयथाव
शं । वशइच्छायामितिधातोः । यथावशंयथेच्छं । शूराणांसकाशाद्बलवत्तमः ॥ ४ ॥ मघोनांयशस्विनांम
हत्तमः । चिकित्वःज्ञातःकर्तरितिवा । नःअभितःसर्वतोनय । इंद्रोविदेसमस्तंव्यजानात् । तमेवस्तुषे ॥ ५ ॥
ऊतयेरक्षायैअभिप्रायसिद्धयेवा । सनोद्विषःशत्रूनतिपारयतुपापानितमांसिवा । क्रतुःज्ञानरूपः । छंदःइच्छा
रूपः । छंद्यत्वाच्छादनत्वाद्वा । ऋतंअशेषशास्त्रावगतं ॥ ६ ॥ सातयेलब्धये । स्रिधःविनाशान् ॥ ७ ॥
पूर्वस्यानादेःसतस्तेसकाशात्यत्सुम्नंसुखंतस्मिन्नःआधेहि । तवपूर्तिःशस्यते ॥८॥ तन्नव्यंस्तुत्यं । ब्रह्मतत्स
म्यग्गृदिमन्यसे । जनस्योपदेशेनत्वत्स्वरूपेषुत्वंचाहंचसंब्रवावहै । गोषुज्ञानेषुगच्छतिज्ञानविषयोभवति । सु
शेवःसुसुखः । समाधिकवर्जितोऽद्वयः ॥ ९ ॥ एवाह्येवैवाहीत्यस्याद्दिदेवतानांसंवादरूपेणोक्तमर्थमतिशये

नावधारयति।अभ्यासोहितातपर्यार्थः।एवंहिएवमेवहीत्यर्थः।विनिश्चितेतुसंवादेविभागोरंगएवचेतिशब्दनि
र्णये।अतोम्नाइइत्यादि। एवमेवहिशक्रोवशाननुयथावशंस्वतंत्रोवर्ततइत्यर्थः।अयपयगतावितिधातोःआ
योइत्यायतिः। उपोइतिवदतिशयार्थओकारः। ओअतिशयइतिचसूत्रं। आयोजानातीत्यायोमन्यः। समी
पस्थमपिजानातीत्युपोमन्यः। अन्येषामिंद्रियाणांपराङ्मुखत्वान्नह्यांतरंजानंति। अयंत्वांतरमप्यापरोक्ष्येणप
श्यति। अयनेनप्राप्यंदूरस्थमायोइतिवा। मनुअवबोधनइतिधातोर्मन्युरितिज्ञानी। बाह्यज्ञायज्ञानिनेआंतर
ज्ञायज्ञानिनइत्यभ्यासोहितातपर्यार्थः। एवंविधंमद्भुतंत्वामुद्दिश्यैवोपेहि। विश्वधविश्वधारक। समीपतोदूरत
श्चत्वांमन्यमानायमह्यंमन्यवेज्ञानायमामुपेहीतिवा। समीपेदूरतोभिज्ञंत्वामुद्दिश्यैवमद्भुतं। एहिविष्णोनमेश
क्तिस्त्वदाह्वानेहिमामुप। इतिब्रह्मास्तुवद्विष्णुंतन्नाभ्युत्थितपद्मगइतिपाद्मे। समीपेदूरतश्चैवध्यायंतंत्वांसदा
विभो। मामेहिज्ञानदानायेत्याहगाधिसुतोहरिमितिस्कांदे।ओतमस्मिञ्जगद्यस्मादोमित्युक्तोहरिःसदा।तमे
वजगदाधारंयतयःपर्युपासतइतिमान्यसंहितायां। इंद्रोवाएताभिर्महानात्मानंनिरमिमीतेत्यस्याप्युक्तएवा
र्थः। निर्माणंनामात्मनस्तद्व्याख्यानेनख्यापनं। नह्यन्यथातासांकरणत्वंभवति। यस्तद्वेदसपितुष्पितासदिति

श्रुतिः।त्रीणिपदानिहितागुहासुयस्तद्वेदसपितुष्पितासत्। स्त्रियःसतीस्ताँउमेपुंसआहुःपश्यदक्षण्वान्नविचेत
दंधः।कविर्यःपुत्रःसईमाचिकेतयस्ताविजानात्सपितुष्पितासत्। इत्यादिश्रुतिभ्योविज्ञानमेवतन्निर्माणं।इंद्रए
कंसूर्यएकंजजानवेनादेकंस्वधयानिष्टतक्षुरित्यादेर्विज्ञापनंवा। प्रचेतनप्रचेतय। आयाहिपिबमत्स्व।क्रतुश्छंद
ऋतंबृहत्। सुम्नआधेहिनोवसोइत्युपसर्गाः।अंशाअप्यंश्यपेक्षयोपसर्गाभवंति।उपसृष्टत्वादुपसर्गाः।अंतर्गतंब
हिर्गतंचद्विधास्यादुपसर्जनं। हस्तबद्धेतिवच्चैवपदानांचोपसर्गवदितिशब्दनिर्णये।अधस्तान्यंजठरेप्रेमरिच्यत
प्रचेतन। दाताराधस्तुवतेकाम्यंवसुप्रचेतय। अस्माकंबोधिचोदितायाहिपिबमत्स्व। तंत्वापरिष्वजामहेक्रतु
श्छंदऋतंबृहत्॥ यातेरातिर्ददिर्वसुसुम्नआधेहिनोवसोइत्युपसृजति। अशेषमहानाम्न्यर्थसंस्मरणपरिज्ञानपूर्व
कमुपसर्गसंयोजनंकर्तव्यमित्येतदर्थत्वेनमहानाम्नीप्रशंसाक्रियते। अन्यथातावन्मात्रप्रशंसामृतेअशेषमहा
नाम्नीप्रशंसायाव्यर्थत्वात्।तृचविभागेन विदामघवन् तमूतये नूनमितिवातिस्रोमहानाम्न्यः। प्रथमायामहा
नाम्नीतद्वाच्यःपार्थिवोहरिः। द्वितीयायाआंतरिक्ष्यस्तृतीयायाद्युगःप्रभुरित्यृक्संहितायां। तृचास्तिस्रोमहा
नाम्न्यःपंचर्चाप्रथमापरा। तृचाद्यृचाचनिगदैस्तार्तीयासप्तभिर्युता।इतित्रेधाविभागःस्याज्जपध्यानादिकर्मस्वि

तिच।त्रिलोकगेनहरिणानिर्मितःषोळशीक्रतुः । एवंज्ञात्वाहरिंतंचकर्मकुर्वन्नजायतइतिप्रवृत्ते । एवाह्येवैवाही
त्यस्यार्थोप्युक्तावधारणरूपत्वात्पूर्वोक्तार्थपरिज्ञानंविनानस्मर्तुंशक्यते। एवंनिर्मितेनषोळशिनाऋद्धोभवत्येवं
वित्।प्रप्रवः।हेऋत्विजःप्रजावावस्त्रिष्टुभमिषंत्रिष्टुभाख्यमन्नमिंद्रःपरमेश्वरःसोमायआविवासति। पुरंध्याधिया
अशेषप्राणिदेहाश्रययास्वबुद्ध्याप्रप्रप्रकर्षेणातितरांशंस्यमानात्रिष्टुप्प्रीतिंकरोति। सोमपानार्थमित्यर्थः।मंद
द्वीरायतस्यवीरस्यपरमेश्वरस्यमंदंप्रीतिंकरोतीतिमंदद्वीरःसोमः।नत्वात्मप्रयोजनायप्रीतिंकरोतिकिंतर्हिवो
मेधसातयेयज्ञसिद्ध्यर्थं। वइतिगुरुत्वादीश्वरंप्रत्येववाबहुवचनं। तदावोन्नंत्रिष्टुभंवोमेधसातयेभवद्दैवत्ययज्ञसि
द्ध्यर्थंभवान्प्रप्राविवासतीत्यर्थः॥१॥नदंवः।ओदतीनांउंदनकर्त्रीणां वःअपांभवदीयानांपतिं वःपुरुषंप्राणंनदं
नदनकर्तारंप्रतिइषुध्यसिपतिर्भवसि।सृष्टौसृष्टौयोयःप्राणस्तंतंप्रतिपतिर्भवसीतिनदमितिपुनर्वचनं।योयुवती
नांगमनशीलानामाकाशेपोप्लूयमानानामब्ध्यानांधूमरूपेणादाह्यानांरेतोरूपेणाजराणांवाधेनूनांजगत्पोष
काणां।धिनुपुष्टावितिधातोः।तानदेनविहरतीत्यादिश्रुतेःपयसासेचकानांदेशाद्देशांतरगमनशीलानामब्ध्या
नांहंतुमयोग्यानांधेनूनांगवांपतिंवायुंप्रतिइषुध्यसीतिवा। वायुर्वावगवांपतिरितिश्रुतेः।धेनुशब्दाच्च।ओदती

नांभक्त्यासेचकानां।योयुवतीनामतिशयेनात्मतत्त्वावगमकानामघ्यानांनित्यानांधेनूनांधर्मार्थकाममोक्षपो
षकाणांवाचांपतिंवायुंप्रतिपतिर्भवसीतिवा । वाचंधेनुमुपासीततस्याश्चत्वारःस्तनाःस्वाहाकारोवषट्कारोहंत
कारःस्वधाकारइति।तस्याद्वौस्तनौदेवाउपजीवंतिस्वाहाकारंचवषट्कारंचहंतकारंमनुष्याःस्वधाकारंपितरस्त
स्याःप्राणऋषभोमनोवत्सइत्यादिश्रुतिभ्यः॥२॥ताः।ताःपृश्नयःआपोगावोवाचोवा। अस्यसूददोहसःप्राणस्य
वायुस्थस्यपरमेश्वरस्यसोमंश्रीणंति । अद्भिर्हिसंसृष्टोभवतिसोमःपयआदिनावाभृतोभवति।मंत्रैर्वागृह्यते ।
अथसूददोहाःप्राणोवैसूददोहाइतिश्रुतिश्च । शोभनमुदंकर्मज्ञानंवादोग्धीतिसूददोहाः । उदेत्युच्चोभवत्यनेन
पुरुषइत्युदंज्ञानादि ।मनोवावसोमःतद्वाचःश्रीणंतिस्वार्थैः । प्रश्नयोग्यत्वात्पृश्नयोवाचः । प्रशंसनरूपत्वात्प्रशं
सनीयत्वाद्वा । प्रशंसनीयत्वमेवअपांगवांच । देवानांजन्मनियज्ञे । तत्रहितेषामभिव्यक्तिः पूर्वंज्ञानेवा । वि
शःप्रजाश्चश्रीणंति ।मुख्यस्ताएवश्रीणंतीतिचशब्दवर्जनं । दिवस्त्रिष्वारोचनेषु । आदित्यचंद्रविद्युत्पर्यंतं
स्थितानांदेवानांजन्मनियज्ञे । यज्ञोवैदेवजन्म। तत्रहिदेवाःप्रादुर्भवंति । आसूर्याचंद्रमसावाविद्युतंतेवैलोका
नधिश्रिताइत्यादिश्रुतेः । द्यौर्वावविद्युत्तत्पतिंवायुमुपगम्यतेनैवपरमुपगच्छति ।सैषाब्रह्मलोकेविराजतइत्या

दिश्रुतेद्यौरेवविद्युत् ॥ ३ ॥ अर्चत। अर्चनंयज्ञादि। प्रार्चनंज्ञानध्यानादि। श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः
परंतपेतिभगवद्वचनात्। प्रिययज्ञाअर्चत। प्रियज्ञानाःप्रार्चत। पुत्रकाःअल्पज्ञानाअप्यर्चत। नबुद्धिभेदंज
नयेदज्ञानांकर्मसंगिनां। जोषयेत्सर्वकर्माणिविद्वान्युक्तःसमाचरन्निति च। उतशब्दाज्ज्ञानिनामप्यर्चनंयुक्तं।
स्वाश्रमानुसारेणेति। अधातेविष्णोविदुषाचिदर्ध्यस्तोमोयज्ञश्चराध्योहविष्मतेतिश्रुतेः। किंतदर्चनीयंधृष्णु
धृष्टंपरंब्रह्मवासुदेवाख्यं। पुरंदेहंनार्चत। प्रत्युद्गमप्रश्रयणाभिवादनंविधीयतेसाधुमिथःसुमध्यमे। प्राज्ञैःपर
स्मैपुरुषायचेतसागुहाशयायैवनदेहमानिनइतिभागवते। सदेहमानिहरयेप्रणमेत्केवलायवा। नदेहायन
तन्मानपरायचकथंचनेतिव्यासस्मृतौ। पुनरर्चतेतितात्पर्यार्थे ॥ १ ॥ गर्गरगोधापिंगादीनांघोषाअपिनाद
मात्रव्यंजकत्वेनभगवद्वाचकाएवेत्याह। अवस्वरातिगर्गरइत्यादिना। एतत्समस्तमिंद्रायैवेत्यर्थः। ब्रह्मवेदो
विशेषतइंद्रायैवोद्यतः। गर्गरइतिपादभूषणमहामत्रकदधिपात्रहस्तिहस्तानांनाम। पिंगाचकोरी। अवपरी
त्यल्पाधिक्यादिविशेषोपितद्वाचकएवेतिज्ञापनाय। चनिष्कददित्यनुकरणशब्दः। सनिष्वणदित्यतिशया
र्थे। तावाएताःसर्वाऋचःसर्वेवेदाःसर्वेघोषाएकैवव्याहृतिःप्राणएवप्राणऋचइत्येवविद्यादितिश्रुतिः। दध्नोमथ

नशब्दश्चाप्यंतर्नादस्वरूपतः। भीषकत्वंहरेर्ब्रूयादंतर्नादोहिभीषणे। गजबृंहितमप्येवंधिकारसहितंवदेत्।स्व
रितेनसमायोगाद्धिकृतौस्वरितोयतः। महामत्रंजलाद्यैश्चयुक्तमेतादृशंवदेत्।पादभूषाचधिकारंतत्कृतंस्वरि
तंवदेत्। अद्भुतत्वंहरेर्वक्तिपिंगाकंठगशब्दवत्। तामेवाद्भुततांवक्तिगृहगोधापरापिचेतिशब्दतत्त्वे॥२॥ यच्चै
न्योनद्यआपतंतितद्घोषश्चेंद्रवाचकः।नदीसमुद्रघोषाश्चनादत्वाच्छ्रैष्ठ्यवाचकाः। नादोहिश्रैष्ठ्यवाचीस्यादेवं
घोषाःपरेपिचेति। तदर्थंचनद्यआपतंति। भूताधिभूतोंबुनिधानमध्येभूत्वाहरिःसर्वहरोतिधाम्ना। अगाधमं
भोविदधातिभस्मयोवाडवाग्निर्नृहरिर्विचिंत्यइतिवैहायससंहितायां। सुदुघाःसुष्ठुअपांदोहनकर्त्र्यः।स्फुरणा
पगमनमासांनास्तीत्यनपस्फुरः। नित्यचलनस्वभावाः। अपगतस्फुरणत्वेनसोमंगृभायत। अचलत्वेनम
नोवा॥३॥ व्यतीन्विशेषेणाधिकान्देवान्। अफाणयद्विस्तारयामास। दाशुषेयजमानाय। तत्समीपे।
फणविस्तारइतिधातोः। सुयुक्तान्सुयोगरतान्।विशेषेणाधिकत्वेनव्यतयोदेवताःस्मृताः। नित्ययोगरताश्चै
वनारायणपरायणाः। तएवचेंद्रियात्मानस्तान्विस्तारयतीश्वरः। मनआदींद्रियाणांतुशक्तिविस्तारएवतु।वि
स्तारोदेवतानांस्याद्भक्तेषुहरिणाकृतइतिप्रकाशसंहितायां।चतुर्भिःसाकंनवतिंचनामभिश्चक्रंनवृत्तंव्यतींरवी

विपदितिश्रुतिः।समेंद्रोमेधयास्पृणोतु। अमृतस्यदेवधारणोभूयासं। शरीरंमेविचर्षणं। जिह्वामेमधुमत्तमा। कर्णाभ्यांभूरिविश्रुवमितिच। नदेवायष्टिमादायरक्षंतिपशुपालवत्। यंतुरक्षितुमिच्छंतिबुद्ध्यासंयोजयंतित मितिभारते। तक्षोजगत्कर्ता। तक्षनिर्माणइतिधातोः। नवर्तवेप्रसवःसर्गतक्षइत्यादिप्रयोगाच्च। नेताचसर्व स्य। तदेववपुःसः। यत्तज्जगत्कर्तृनेतृरूपं। देहदेहिविभागश्चनक्वचित्परमेश्वरे। गुणतद्वद्विभागोवानेहनाने तिचश्रुतेरितिपाद्मे। तद्विज्ञानेनपरिपश्यंतिधीराआनंदरूपममृतंयद्विभाति। सद्देहःसुखगंधश्चज्ञानभाःस त्पराक्रमःज्ञानज्ञानःसुखसुखःसविष्णुःपरमोक्षरइतिश्रुतेश्च।विशुद्धविज्ञानमरीचिमालयासचित्ररत्नप्रकरप्र काशया।प्रकाशिताशेषजगत्स्वरूपयाप्रभुःसदाह्लादतनुर्विभूषितइतिपुरुषोत्तमसंहितायां।उपमाउपमायां। उपमाविषयेअमुच्यतत्यक्तोभवत्।निरुपमइत्यर्थः।अल्पाक्षरेणशक्येपिवक्तुंबह्वक्षरंयदि।उक्तस्याधिक्यमेवात्र निषेधेऽशेषतोभवेदितिशब्दनिर्णये ॥१॥ विश्वाविश्वान्द्विषोऽज्ञानपापादीनतीत्यशक्तोविष्णुःस्वभक्तानति वहत्येवहि।यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्माविवृणुतेतनूंस्वां। तेषामहंसमुद्धर्तामृत्युसंसारसागरात्। भवा मिनचिरात्पार्थमय्यावेशितचेतसामित्यादिप्रसिद्धिंउशब्देनाह।द्विषोतीत्यातिशयेनात्मानंप्रत्योहतइत्यतिश

ब्द्ध्यार्थः । ओदनंउंदतेः कर्मबंधनमभिनद्धगवान् । कानीनोबादरायणः । परः परमात्मा । गिरैवपच्यमानंपरि
पाककाले । संश्लेषादोदनंकर्मपच्यमानंगिरैवहि । अभिनद्धगवान्व्यासः स्वभक्तानामशेषतइतिव्याससंहितायां
॥२॥ अर्भकइवस्थितोनवंरथमध्यतिष्ठत् । कुमारः कुत्सितमारकः । अर्भकइवसूक्ष्मदेहः । पूर्वंपूर्वंदेहंपरित्यज्य
नवंनवंदेहमध्यतिष्ठज्जीवमादाय । जीवदेहंपरित्यज्यसहजीवेनचेश्वरः । जीवस्यान्यशरीरंचसमुत्पाद्यविश
त्यजइतिमान्यसंहितायां । कुमारकइवार्भकः सूक्ष्मदेहइतिवा । अर्भकः सूक्ष्मदेहोपिनकुमारइतिवा । सपक्ष
त्परिपक्वज्ञानादिगुणमकरोत् । महिषं महांतंब्रह्माणं मृगं मृगयंतंस्वात्मानं पित्रे स्वस्मै मात्रे लक्ष्म्यै विभुक्रतुं
पितृमातृविषयेपूर्णज्ञानं पुनः पूरयामासेत्यर्थः । ज्ञानपूर्णंविधातारंमोक्षदानेनकेशवः । स्वपुत्रंपूरयामासमहिषं
महतांमहानितिप्रवृत्ते ॥३॥ यथास्थिताः प्रज्ञाताः । इतस्ततः संयोजनंविनायथास्थितशंसनंपथः प्राप्तिः । व्या
प्तोविशेषेणापन्नः । अविहतमसंसृष्टं । कृच्छ्रादयथास्थितशंसननिमित्ताद्दुःखादवाग्गतिंगतश्रीकतामेवप्राप्नुयां
। विलोमः शत्रुजयकृत्संसर्गः पापनाशनः । यथास्थितः श्रीकरः स्यात्स्वाध्यायः शंसनेपिचेतिप्रवृत्ते । गतश्रियः
श्रियोहानिंपापहानिंपरस्यच । संसर्गश्छंदसांकुर्याच्छ्रियोवृद्धिंयथास्थितइतिस्वाध्यायतत्त्वे । किंचित्त्वेचोभ

यत्वेचसंशयेसदृशेतथा। इवशब्दःप्रयुज्येतन्यक्कारेपिचपंडितैरितिशब्दनिर्णये।अतोगतश्रीत्वसंशयेपीत्यर्थः
। इतस्ततोविशेषेणसंहृतंसंयोजितंविहृतं। पापानांव्यतिषिक्तत्वाद्यतिषिक्तंविनाशकं। धनस्याव्यतिषंगेणव्य
तिषंगोऽविनाशकः। सदृशंसदृशस्यैवयतःस्यात्प्रविनाशकं। तथाप्यप्राप्तनाशस्यधनस्यबलवत्त्वतः। शङ्कया
न्नविनाशायपापस्येच्छासमेधितं।संसृष्टंस्याद्विनाशायनहीच्छाधनसंक्षयइतिस्वाध्यायतत्त्वे। अव्यतिषक्तत्वं
चमोक्षेवर्ततइत्यत्रोभयार्थइवशब्दः।एवंभूतेनशंसनेनपाप्मानमपहंति।शमलंरागादिकंच। पापस्यपृथगुक्तेः।
शमलंपापमुद्दिष्टंरागद्वेषादिकंतथा। अपराधश्चशमलंमलंचशमलंविदुरितिशब्दनिर्णये। यएवमुपास्तेसोपि
पाप्मानमपहंति। ऋक्षुसंसृज्यमानासुप्रोच्यमानंजनार्दनं। पुंसंसृष्टस्यपापस्यनिहंतारंविशेषतः। तत्प्रसादेन
मुक्तस्यपापासंसृष्टतामपि। ध्यायन्कर्माण्यकृत्वापिमुच्यतेसर्वपातकैरितिप्रवृत्ते॥ ७॥ नचैवमादिवाक्यानां
स्वार्थेप्रामाण्याभावः। सिद्धार्थेप्रामाण्यस्यसाधितत्वात्। अविरोधाच्च।नचबह्वर्थेषुतात्पर्यकल्पनेकल्पनागौ
रवं। वचनेनैवप्रतीयमानत्वादर्थस्यकल्पनाभावात्।नचवाचनिकस्तात्पर्यार्थइतिविशेषः। तन्मानाभावात्।
यत्रवाचनिकार्थादन्यस्तात्पर्यार्थःप्रतीयतेलौकिकवाक्येषुनतत्रसाक्षाद्वचनंबोधकं। वचनलिंगकानुमाहि

सा । विरोधादमुख्यवृत्तिर्वा । आप्तत्वनिश्चये । आप्तत्वानिश्चयेप्रामाण्यमेवनभवति । वेदवाक्यस्यतुवाचनि
कार्थंविनानैवान्योयुज्यते । वाचनिकानांतुबहूनामप्यविरोधेस्वीकार्यता ॥ ॐस्वाप्ययसंपत्त्योरन्यतरापेक्ष
माविष्कृतंहीतिसूत्रं । वानात्सूतेर्देवनाद्वासुदेवोवासाद्द्युतेश्छादनाक्रीडयाच । बलादसुत्वाद्दातृतोवर्तनाच्च
तंवासुदेवंप्रवदंतिवेदाइत्यादिसौकरायणश्रुतिः । मोक्षेपिसुप्तिरस्तीत्याशंकानिवृत्त्यर्थमेवान्यतरपदं । रूढियो
गौविनाकश्चिन्नैवार्थोवेदगोभवेत् । तत्रापियौगिकोमुख्यःसर्वत्रास्तिसवैदिके । अनवस्थानिवृत्त्यर्थंयौगिकेरूढ
कल्पना । ज्ञातेविशेषविज्ञानंव्यवहारोपिरूढितइतिब्रह्मतर्के । वाचनिकमर्थंपरित्यज्यनियोगार्थकल्पनेश्रुतहा
निरश्रुतकल्पनेतिसर्वदोषाधिकौतस्यव्यर्थमापद्येते । एवंचवदतोविधिशब्दानिरर्थकाःसिद्धार्थावासिद्धशब्दा
वास्वार्थेप्रमाणभूताइत्युक्तेकिमुत्तरं । नचकारणंकिंचिद्वाचनिकानांबहूनामप्यर्थानांत्यागे । प्रतीयमानेतुविरो
धेतदन्योर्थःस्वीकार्योवाचनिकएव । सोपिवाचनिकएवेत्यपिततएवसिद्ध्यति । मुख्यार्थानांचसर्वेषांतारतम्यं
चविद्यते । तत्रापिपरमोमुख्योवाच्योशेषरवैर्हरिः । तत्तन्मुख्याविरोधेनतदन्यार्थस्यसंग्रहः । स्वतोमुख्यविरो
धेतुत्याज्योन्योर्थोखिलेष्वपि । इतिसर्वत्रनियमःशब्दार्थज्ञानभूमिष्विति च । नचक्रियायामेवप्रयोजनंनसिद्धइ

तियुक्तं।ज्ञानमात्रेपिमहाप्रयोजनदर्शनात्पितृजीवनादिवाक्ये। आहचस्वयंभगवान्। द्वाविमौपुरुषौलोकेक्ष
रश्चाक्षरएवच।क्षरःसर्वाणिभूतानिकूटस्थोक्षरउच्यते।उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः।योलोकत्रयमावि
श्यबिभर्त्यव्ययईश्वरः। यस्मात्क्षरमतीतोहमक्षरादपिचोत्तमः॥ अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः।योमा
मेवमसंमूढोजानातिपुरुषोत्तमं। ससर्वविद्भजतिमांसर्वभावेनभारत। इतिगुह्यतमंशास्त्रमिदमुक्तंमयानघ।ए
तद्बुद्ध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारतेति।श्रेयान्द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञःपरंतपेतिच। ध्यानंत्वखिलकर्मभ्यो
ध्यानाच्चज्ञानमुत्तमं। नज्ञानसदृशंकिंचित्पुरुषार्थप्रसिद्धयइतिप्रवृत्ते। दूरेणह्यवरंकर्मबुद्धियोगाद्धनंजयेतिच
। अशेषकर्मपूगोपिनविष्णुध्यानलेशभाक्। तच्चध्यानंहरेर्ज्ञानकोट्यंशायनपूर्यतइतिकर्मविवेके। तमेवंविद्वा
नमृतइहभवति नान्यःपंथाअयनायविद्यतइतिचश्रुतिः। नचकर्ममात्रेपर्यवसितिर्वेदस्य। सुखज्ञानस्यैवप्रयो
जनत्वात्। अतःसिद्धस्यैवप्रयोजनत्वंवाच्यं। प्रशंसादीनांचतात्पर्यंवाचनिकार्थात्यागेनैवकथितंस्वयंभग
वता॥ ॐभाक्तंवानात्मवित्त्वात्तथाहिदर्शयतीति। तस्माद्विरुद्धवत्प्रतीयमानानिप्रशंसादीनिज्ञानसहकार्य
पेक्षयायोजनीयानि। पुराणादीनांतुश्रुत्यादिविरोधेगौणोप्यर्थोयुज्यते। कुहकंचेंद्रजालंचविरुद्धाचरणानि

च । दर्शयित्वाजनंसर्वंमोहयाशुमहेश्वरेत्यादिवाराहे ॥७॥ ब्रध्नस्यसूर्यस्यविष्टपंस्वर्गमुद्गन्वहींद्रोहंचयत्तदिं
द्रगृहंब्रध्नंविष्टपंमध्वःपीत्वातत्रसचेववहिसुखमनुभवाव । सख्युरिंद्रस्यत्रिस्सप्तस्थानेषु । एकविंशतिदिव्यानि
स्थानानिदिविचक्रिणः । वज्रिणोवापितद्भक्तेर्भुज्यंतेतानियाज्ञिकैरितिप्रवृत्ते । पूर्वान्सुतान्प्रातःसवनगा
न्सोमानपाः । हरीनिंद्रियाणिवर्तयतीतिहरिवः । हरिभिर्वर्ततइतिवा । इदंमाध्यंदिनंसवनंकेवलंते । अ
थोइत्यर्थांतरं । मधुमंतंसोमंजठरेआवृषस्वआसिंचममद्धिचसत्राअस्मत्त्राणेनसह । पीतशब्दवत् । अपूर्व
पानत्वात्तदेवपानंमुख्यमितिपीतशब्दः । इंद्रस्यकेवलत्वात्केवलंमाध्यंदिनंसवनं । ममद्धीतितृतीयसवनं ।
तत्रहिमदोविशेषतोभवतिपूर्तेः । इतिसवनत्रयरूपताषोळशिनः । वृषण्वत्वृषणःइंद्रस्यविशेषतःप्रियत्वात् ।
एवंचतूरूपताषोळशिनः । राध्नोतिऋद्धोभवति । विहृतपक्षेतु । पादान्व्यवधायार्धर्चशःशंसेत् । पूर्वासांपूर्वा
णिपदानि । गायत्र्यःपंक्तिभिःपंक्तीनांतुद्वेद्वेपदेशिष्येतेताभ्यांप्रणुयात् । उष्णिहोबृहतीभिरुष्णिहांतूत्तमा
न्पादान्द्वौद्वौकुर्यात् । चतुरक्षरमाद्यं । द्विपदाश्चतुर्धाकृत्वाप्रथमांत्रिष्टुभोत्तराजगतीभिःउत्तमायाश्चतुर्थमक्षर
मंत्यंपूर्वस्याद्यमुत्तरस्यानुष्टुभमतिछंदस्स्ववदध्यात् । द्वितीयतृतीययोःपादयोरवसानेउपदध्यात् । प्रचेतनेति

पूर्वस्यां । प्रचेतयेत्युत्तरस्यां। उत्तरास्वितरान्पादान्षष्ठान्कृत्वाअनुष्टुप्प्रकारंशंसेत्।महानाम्नीनांपंचाक्षरानुपस र्गानुपसृजत्येकादशाक्षरेषुपादेषु । एवाह्येवाअपाःपूर्वेषांहरिवःसुतानांएवाहींद्रंअथोइदंसवनंकेवलंते एवा हिशक्रोममद्धिसोमंमधुमंतमिंद्रवशीहिशक्रःसत्रावृषंजठरआवृषस्वेति।भगवद्भक्तिज्ञानवैराग्यपूर्वकंचकर्मक र्तव्यं। इष्टापूर्तंमन्यमानावरिष्ठंनान्यच्छ्रेयोवेदयंतेप्रमूढाः।नाकस्यपृष्ठेसुकृतेतेनुभूत्वाइमंलोकंहीनतरंवाविशं ति। नैष्कर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलंनिरंजनं। कुतःपुनःशश्वदभद्रमीश्वरेनचार्पितंकर्मयदप्य कारणं । यतःप्रवृत्तिर्भूतानांयेनसर्वमिदंततं । स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवः । त्रैविद्यामांसोमपाः पूतपापायज्ञैरिष्ट्वास्वर्गतिंप्रार्थयंते । तेपुण्यमासाद्यसुरेंद्रलोकमश्नंतिदिव्यान्दिविदेवभोगान् । मयिसर्वाणिक र्माणिसंन्यस्याध्यात्मचेतसा । निराशीर्निर्ममोभूत्वायुध्यस्वविगतज्वरः। येमेमतमिदंनित्यमनुतिष्ठंतिमान वाः । श्रद्धावंतोनसूयंतोमुच्यंतेतेपिकर्मभिः । येत्वेतदभ्यसूयंतोनानुतिष्ठंतिमेमतं । सर्वज्ञानविमूढांस्तान्वि द्धिनष्टानचेतसः । तपस्विनोदानपरायशस्विनोमनस्विनोमंत्रविदःसुमंगलाः । क्षेमंनविंदंतिविनायदर्पणंत स्मैसुभद्रश्रवसेनमोनमः । एषउएवदाश्वान्यएवंवेद । यदेवविद्ययाकरोतिश्रद्धयोपनिषदातदेववीर्यवत्तरंभ

वति। परंभावमजानंतोममभूतमहेश्वरं। मोघाशामोघकर्माणोमोघज्ञानाविचेतसः। सर्वगुह्यतमंभूयःशृणुमे
परमंवचः। इष्टोसिमेदृढमितिततोवक्ष्यामितेहितं। मन्मनाभवमद्भक्तोमद्याजीमांनमस्कुरु। मामेवैष्यसिस
त्यंतेप्रतिजानेप्रियोसिमे। विज्ञानमानंदंब्रह्मरातिर्दातुःपरायणं। तिष्ठमानस्यतद्विदइत्यादिश्रुतिस्मृतिभ्यः।
नमोनारायणायाजभवशक्रोषणरुड्मुखैः। सदावंदितपादायश्रीपायप्रेयसेधिकं॥ ॥इतिश्रीमदानंदतीर्थभ
गवत्पादाचार्यविरचितःकर्मनिर्णयःसंपूर्णः॥ ॥ छ ॥ ॥ छ ॥ ॥

विष्णुत. श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः॥ ॥ ॐ ॥ सदागमैकविज्ञेयंसमती विनि.
॥ १ ॥ तक्षराक्षरं। नारायणंसदावंदेनिर्दोषाशेषसद्गुणं॥ विशेषणानियानीहकथितानिसदुक्तिभिः। साधयिष्यामि प० १
तान्येवक्रमात्सज्जनसंविदे॥ऋगाद्याभारतंचैवपंचरात्रमथाखिलं। मूलरामायणंचैवपुराणंचैतदात्मकं। येचा
नुयायिनस्त्वेषांसर्वेतेचसदागमाः। दुरागमास्तदन्येयेतैर्नज्ञेयोजनार्दनः। ज्ञेयएतैस्सदायुक्तैर्भक्तिमद्भिःसुनि
ष्ठितैः। नचकेवलतर्केणनाक्षजेननकेनचित्। केवलागमविज्ञेयोभक्तैरेवनचान्यथेतिब्रह्मांडे। नावेदविन्मनुते
तंबृहंतंसर्वानुभुमात्मानंसांपरायइतितैत्तिरीयश्रुतिः। नैषातर्केणमतिरापनेयाप्रोक्तान्येनैवसुज्ञानायप्रेष्ठेति
कठश्रुतिः। नेंद्रियाणिनानुमानंवेदाह्येवैनंदयंतितस्मादाहुर्वेदाइतिपिप्पलादश्रुतिः। नचैतेषांवचनानामेवा
प्रामाण्यं। अपौरुषेयत्वाद्वेदस्य। इतिहासपुराणःपंचमोवेदानांवेदइतितद्गृहीतत्वाच्च। नचापौरुषेयंवाक्यमेव
नास्तीतिवाच्यं। तदभावेसर्वसमयाभिमतधर्माद्यसिद्धेः। यस्यतौनाभिमतौनासौसमयी। समयप्रयोजना
भावात्। नचतेनलोकोपकारः। धर्माद्यभावज्ञानेपरस्परंहिंसादिनाऽपकारस्यैवप्राप्तेः। नचोपकारेणतस्यप्र ॥२५९॥
योजनं। अदृष्टाभावात्। अतोधर्माद्यभावंवदतास्वसमयस्यानर्थक्यमंगीकृतमेवेतिनासौसमयी। नचपौरुषे

येणवाक्येनतत्सिद्धिः। अज्ञानविप्रलंभयोःप्राप्तेः। नचतदर्थत्वेनसर्वज्ञःकल्प्येत। अन्यत्रादृष्टस्यसर्वज्ञत्वस्य कल्पनंतस्याविप्रलंभकत्वकल्पनंतस्यतत्कृतत्वकल्पनंचेतिकल्पनागौरवप्राप्तेः।अपौरुषेयवाक्यांगीकारेनकिं चित्कल्प्यं। अपौरुषेयत्वंचस्वतएवसिद्धं। वेदकर्तुरप्रसिद्धेः। अप्रसिद्धौचकर्तुस्तत्कल्पनेकल्पनागौरवं। अ कल्पनेचाकर्तृकत्वंसिद्धमेव। नचलौकिकवाक्यवत्सकर्तृकत्वं। तस्याकर्तृकत्वप्रसिद्ध्यभावात्। नचकेनचि त्कृत्वावेदइत्युक्तंवेदसमं। परंपराभावात्। नचस्वयंप्रतिभातवेदैर्दृष्टमवेदवाक्यंभवति। परंपरासिद्धवेदवाक्या नुसारित्वात्। वेदद्रष्टॄणामुक्तगुणवत्त्वाच्चतेषां। उक्तंचब्रह्मांडे। विंशल्लक्षणतोनूनस्तपस्वीबहुवेदवित्। वेदइत्ये वयंपश्येत्सवेदोज्ञानदर्शनादिति। प्रामाण्यंचस्वतएव। अन्यथानवस्थानात्। नचोक्तयुक्त्यधीनत्वंप्रामाण्य स्य। बुद्धिदोषनिरासमात्रकारणत्वाद्युक्तीनां। अदुष्टबुद्धीनांस्वतएवसिद्धत्वाच्चप्रामाण्यस्य। नचाकांक्षाया मेवप्रमाणांतरापेक्षत्वादनवस्थाभावइतिवाच्यं। आकांक्षायाएवबुद्धिदोषात्मकत्वात्। दुष्टबुद्धीनामेवाप्रामा ण्यशंकेतिपरतोप्रामाण्यं। प्रामाण्यंचस्वतएवसिद्धं। नचोच्चारणकालएववर्णानामुत्पत्तिरितिवाच्यं। तदेवे दंवचनमितिप्रत्यभिज्ञाविरोधात्। नचसादृश्यात्प्रत्यभिज्ञाभ्रांतिरितिवाच्यं। सोयंदेवदत्तइत्यादेरपितथात्व

प्राप्तेः। सर्वक्षणिकत्वंवदताबौद्धेनसेयंदिगित्यादिप्रत्यभिज्ञायाभ्रांतित्वंनवाच्यं। पंचस्कंधेभ्योन्यत्वात् । नच
दिशएवभ्रांतिकल्पिताः। विज्ञानशून्ययोरपिसाम्यात् । नचादित्योदयादिनैवदिक्कल्पना । अंधकारेपिदि
ज्ञात्रप्रतीतेः। कादाचित्कभ्रांतिरेवादित्योदयादिदर्शनान्निवार्यते। साचविज्ञानशून्ययोरपिभवतीतितेषांम
तं। वादिविप्रतिपत्तेः। अतोदिशःस्थिराएवेतिसिद्ध्यतिशून्यवदेव । अतस्तद्वद्वेदस्यापिस्थैर्यंसिद्धं। तदेवेदं
वाक्यमितिप्रत्यभिज्ञानात्। नचानुमानादीनामागमंविनाप्रामाण्यंधर्मादिषु। तदगोचरत्वात्। अतोपौरुषे
यवाक्येनैवधर्मादिसिद्धेःसर्ववादिनामपितदंगीकार्यं। तत्प्रामाण्यंचस्वतएवसिद्धं। अप्रामाण्यस्यचपरतस्त्वा
नंगीकारेदुष्टेंद्रियादेरप्यप्रामाण्यहेतुत्वंनस्यात्। तदनंगीकारेचानुभवविरोधः।अतःप्रामाण्यंस्वतःपरतोऽप्रा
माण्यमितिसिद्धं। वाचाविरूपनित्यया। नित्ययानित्ययास्तौमिब्रह्मतत्परमंपदमिति। श्रुतिर्वावनित्याअनि
त्यावावस्मृतयोयाश्चान्यावाचइतिपैंगीश्रुतिः। विज्ञेयंपरमंब्रह्मज्ञापिकापरमाश्रुतिः।अनादिनित्यासातच्चवि
नातांनसगम्यतइतिकात्यायनश्रुतिः।सहस्रधामहिमानःसहस्रंयावद्ब्रह्मविष्ठितंतावतीवाक्।कश्छंदसांयोगमा
वेदधीरःकोधिष्ण्यांप्रतिवाचंपपादेत्यादिच। नित्यावेदाःसमस्ताश्चशाश्वताविष्णुबुद्धिगाः । सर्गेसर्गेऽमुनैवै

तउद्गीर्यंतेतथैवच । तत्क्रमेणैवतैर्वर्णैस्तैःस्वरैरेवनान्यथा । अतःश्रुतित्वमेतासांश्रुताएवयतोखिलैः। जन्मांतरे
श्रुतास्तास्तुवासुदेवप्रसादतः । मुनीनाप्रातिभास्यंतिभागेनैवनसर्वशः।यतस्ताहरिणादृष्टाःश्रुताएवापरैर्जनैः
श्रुतयोदृष्टयश्चेतितेनोच्यंतेपुरातनैः।तदुत्पत्तिवचश्चैवभवेद्व्यक्तिमपेक्ष्यतु।चेतनस्यजनिर्यद्वदुच्यतेसर्वलौकि
कैः।पुराणानितदर्थानिसर्गेसर्गेन्यथैवतु।क्रियंतेतस्त्वनित्यानितदर्थाःपूर्वसर्गवत् ।वेदानांसृष्टिवाक्यानिभवेयु
र्व्यक्त्यपेक्षया । अवांतराभिमानानांदेवानांवाव्यपेक्षया । नानित्यत्वात्कुतस्तेषामनित्यत्वंस्थिरात्मनामितिब्र
ह्मांडे । नचानित्यत्वेश्रुतिर्वेदइत्यादिविशेषशब्दउपपद्यते । वेदास्तेनित्यविन्नत्वाच्छ्रुतयश्चाखिलैःश्रुतेः । आ
म्नायोनन्यथापाठादीशबुद्धिस्थिताःसदेतिमहावाराहे । नचनित्यत्वंविनावेदानांदर्शनव्यवहारोयुज्यते ।नच
वर्णपदादीनामनित्यत्वंवक्तुंयुक्तं।सर्वज्ञत्वादीश्वरस्यतद्बुद्धौसर्वदाप्रतीयमानत्वात्।नचघटादिवत्संस्कारमात्र
त्वंवक्तुंयुक्तं। प्रत्यभिज्ञाविरोधस्योक्तत्वात् ।पुराणानामप्यन्यथाशब्दरचनमेवानित्यत्वं ।अतआकाशगुणेश
ब्देव्यज्यमानावर्णादयस्तत्क्रमात्मकोवेदश्चनित्यएवेतिसिद्धं। नचकेवलसिद्धेर्थेव्युत्पत्त्यभावादप्रामाण्यं । सि
द्धान्वितएवव्युत्पत्तिगृहीतेः । इयंमाताऽयंपितेत्यादावंगुलिप्रसारणादिपूर्वकनिर्देशेनैवहितज्जानाति। का

र्यान्वितएवव्युत्पत्तिरितिवदतःकार्यस्यकार्यान्वयाभावात्कल्पनागौरवं। इयंमाताऽयंपितासुरूपोसीत्यादौ
सिद्धमात्रज्ञापनेनपर्यवसितत्वाद्वाक्यस्य। तस्यतत्रप्रामाण्यानुभवाच्च। नचकुत्रचित्सिद्धज्ञापनादन्यद्वाक्यस्य
प्रयोजनंदृष्टं।ज्ञात्वैवहीष्टसाधनतांप्रवर्ततेनिवर्ततेचविपर्ययेण । अतःसिद्धएवसर्ववाक्यानांप्रामाण्यंसिद्धं ।
प्रसिद्धंचव्याकरणनिरुक्तादीनांसिद्धमात्रेप्रामाण्यंसर्ववादिनां। तदनंगीकारेचसर्वशाब्दव्यवहारासिद्धिः ।
उक्तंचनारदीये । सर्वज्ञंसर्वकर्तारंनारायणमनामयं । सर्वोत्तमंज्ञापयंतिमहातात्पर्यमत्रहि । सर्वेषामपिवेदा
नामितिहासपुराणयोः । प्रमाणानांचसर्वेषांतदर्थंचान्यदुच्यतइति । नचजीवेश्वराभेदएवतात्पर्यमागमस्य।
तत्रप्रमाणाभावात् । नचजीवेश्वरभेदःसिद्धइत्यनुवादकत्वंभेदवाक्यानां । आगमंविनेश्वरस्यैवासिद्धेः । न
चानुमानात्तत्सिद्धिः । विपर्ययेणाप्यनुमातुंशक्यत्वात्। विमतंसकर्तृकंकार्यत्वाद्घटवदित्युक्तेविमतंविकर्तृक
मस्मत्संमतकर्तृरहितत्वादात्मवदित्यनुमानविरोधात्। अकार्यत्वमुपाधिरित्युक्तेशरीरिजन्यत्वमितरत्राप्युपा
धिरित्युत्तरं । प्रत्यक्षानुमानसिद्धत्वेचभेदस्यतद्विरोधादेवाप्रामाण्यमभेदागमस्य। तेनाभेदागमस्यप्रामाण्या
भावे नानुवादकत्वंभेदवाक्यानां ।नहिबलवतोनुवादकत्वं। दार्ढ्यहेतुत्वात्। प्रत्यक्षादेरागमस्यप्राबल्येपिनो

पजीव्यप्रमाणविरोधेप्रामाण्यं। विषयाभावेस्वस्यैवाप्रामाण्यप्राप्तेः । तेनैवह्यनुमानादिनागमस्यविषयःसिद्ध्य
तितत्पक्षेपि। अनुमानेनह्यनुवादित्वपक्षईश्वरोबोद्धव्यःप्रत्यक्षेणचागमः। अतस्तयोर्विरोधेप्रामाण्यंनस्यात्।
अनुमानसिद्धेश्वराच्चभेदोनुभवतएवसिद्धोजीवस्य।असर्वकर्तृत्वेनानुभवात्। नचानुभवविरोधेआगमस्यप्रा
माण्यं।आगमप्रामाण्यानुभवस्याप्यप्रामाण्यप्राप्तेः।बहुप्रमाणसंवादश्चदार्ढ्यहेतुरेव। बहूनांवचनेतस्यैवदर्शने
दार्ढ्यस्यैवदृष्टेः।सर्वाविवादस्थलएवकथंचिदनुवादकत्वं। नचात्रसर्वाविवादः। एकत्ववादिनामेवविवाददर्श
नात्।बहुप्रमाणविरोधेचैकस्याप्रामाण्यंदृष्टंशुक्तिरजतादौ। नचदोषजन्यत्वादेवदुर्बलत्वमितिविरोधः। बहु
प्रमाणविरुद्धानांदोषजन्यत्वनियमात्।दोषजन्यत्वंचबलवत्प्रमाणविरोधादेवज्ञायते।अदुष्टमिंद्रियंत्वक्षंतर्कोऽ
दुष्टस्तथानुमा। आगमोऽदुष्टवाक्यंचस्वदृक्चानुभवःस्मृतः। बलवत्प्रमाणतश्चैवज्ञेयादोषानचान्यथा। द्विविधं
बलवत्त्वंचबहुत्वाच्चस्वभावतः। तयोःस्वभावोबलवानुपजीव्यादिकश्चसः।याथार्थ्यमेवप्रामाण्यंतन्मुख्यंज्ञान
शब्दयोः। ज्ञानंचद्विविधंबाह्यंतथानुभवरूपकं।बल्येवानुभवस्तत्रनिर्दोषत्वक्षजादिकं। अनुप्रमाणतांयातित
थाक्षादित्रयंततः।प्राबल्यमागमस्यैवजात्यातेषुत्रिषुस्मृतं।उपजीव्यविरोधेतुनप्रामाण्यममुष्यच। यामाहुरनु

मांकेचित्रियाद्यवयवात्मिकां । साव्यर्थानोपपत्त्याहिविनासापिप्रमाणतां । यात्यतोयुक्तिरेवैकाप्रमाणमनुमा
त्मकं । युक्तिःप्रतिज्ञारूपाचहेतुदृष्टांतरूपिका। तथोपनयरूपाचपरानिगमनात्मिका । पृथक्पृथक्प्रमाणत्वंया
तियुक्तितयैवतु । प्रतिज्ञाहेतुगर्भैवपृथक्प्रामाण्यमेष्यति । सिद्धत्वेनप्रतिज्ञायाहेतुर्मानंपृथग्भवेत् । प्रतिज्ञावय
वत्वात्तुस्वातंत्र्येणैवमानतां । दृष्टांतोयात्युपनयोव्याप्तिमाश्रित्यकेवलं । व्याप्तिस्तुकेवलापिस्यात्प्रमाणंनियमा
श्रयात् । तथानिगमनंचोपसंहारैकस्वरूपतः । प्रामाण्यंयात्यनुभवोज्ञापयत्युपपत्तितां । विरोधश्चतथाधिक्यं
न्यूनतासंगतिस्तथा । उपपत्तिदोषाविज्ञेयाविरोधश्चस्वतोन्यतः । जनकस्यात्ययोजातिःस्वस्यवान्यस्यवाभवे
त् । जनकंप्रमाणमुद्दिष्टंस्वस्यार्थस्यप्रकाशनात् । निग्रहाएतएवस्युःसंवादानुक्तिसंयुताः । अर्थतःप्राप्तिरेवा
र्थापत्तिरित्यभिधीयते । दृष्ट्वासदृशमेवान्यंपूर्वदृष्टेतुवस्तुनि।एतत्सदृशताज्ञानमुपमानंप्रकीर्तितं। अभावस्यप
रिज्ञानंद्विविधंसमुदाहृतं । एकंतत्रानुभवतोयोग्यस्यानुपलब्धितः । द्वितीयमपिविज्ञेयंसुखाद्येचघटादिके । ए
कंप्रत्यक्षरूपंस्याद्वितीयमनुमात्मकं । क्वचिद्घटाद्यभावोपिप्रत्यक्षेणावगम्यते । झटित्येवपरिज्ञानान्नलिंगोद्ध
वतामता । अर्थापत्तिश्चोपमाचह्यनुमाभेदएवतु । आगमोद्विविधोज्ञेयोनित्योऽनित्यस्तथैवच । प्रत्यक्षंत्रि

विधंज्ञेयमैश्वरंयौगिकंतथा।अयौगिकंचेतितथासर्वमक्षात्मकंमतं।अक्षाणिचस्वरूपाणिनित्यज्ञानात्मकानिच
विष्णोःश्रियस्तथैवोक्तान्यन्येषांद्विविधानितु। स्वरूपाणिचभिन्नानिभिन्नानित्रिविधानिच।दैवासुराणिमध्या
नीत्येतत्प्रत्यक्षमीरितं।विषयान्प्रतिस्थितंह्यक्षंप्रत्यक्षमितिकीर्तितं।अक्षयंपुरुषस्याक्षंस्वरूपेमुख्यमेवतु।उपचा
रस्तदन्यत्रसृष्टावुपचयोयतः।उपपत्तिस्वरूपत्वादनुमासंभवादिकं । प्रत्यक्षागममाहात्म्यादनुमानंप्रमाणतां।
यातिनैवान्यथातस्यनियतत्वंक्कचिद्भवेदित्यादिब्रह्मतर्के । अत्रचोपजीव्यत्वेनप्रमाणप्राबल्याद्भेदएवतात्पर्यं
युक्तं।कथंचानुवादकत्वंभेदस्यप्रमाणेनासिद्धौ।सिद्धौचकथमभेदवाक्यस्याबाधः । नचाप्रमाणसिद्धेनानुवाद
कत्वंप्रमाणस्यभवति।दुर्बलत्वेचभेदप्रमाणस्याभासत्वान्नभेदवाक्यानामनुवादित्वं। अतश्चभेदवाक्यानामेव
प्राबल्यं। सर्वप्रमाणविरुद्धवचनानामेवप्राबल्यांगीकारेइदंवाअग्रेनैवकिंचनासीदसतःसदजायतेत्यादीनामे
वाविचारेणप्रतीयमानस्यार्थस्यसर्वप्रमाणविरुद्धत्वात्तत्रसर्वागमानांमहातात्पर्यंप्रसज्येत।नचतत्रयुक्तिविरो
धइतिवाच्यं।तस्मिन्पक्षेयुक्तिविरुद्धत्वेनाननुवादित्वमितिगुणएवस्यात्। युक्तिसिद्धत्वेह्यनुवादित्वंस्यात्। अ
तःप्रमाणसिद्धत्वेतदपलापायुक्तेरप्रमाणसिद्धत्वेचभेदप्रमाणस्यानुवादित्वाभावाच्चनभेदवाक्यानांदौर्बल्यं।

नचप्रमाणबहुत्वेदौर्बल्यं।दार्ढ्यमेवहिबहुवाक्यसंवादेदृष्टं।तथासत्यभ्यासादेरप्यप्रामाण्यहेतुत्वंस्यात्। अभ्या
सस्यचतात्पर्यलिंगत्वंसर्वेषांसिद्धं । तदनंगीकारेतत्पक्षेपिनवक्तृत्वस्तत्त्वमसीत्यभ्यासस्यानुवादकत्वेनाप्रामा
ण्यंस्यात्।प्रथमवाक्येनैवयस्यासिद्धंतदर्थमपरमित्युक्तेप्रत्यक्षादिनाभेदोयेनानिश्चितस्तदर्थंवाक्यमित्युत्तरं।त
स्माद्बहुप्रमाणसंवादित्वेप्राबल्यमेव।अतःसर्वप्रमाणविरुद्धत्वान्नाभेदेतात्पर्यंवाक्यस्यकिंतुविष्णोस्सर्वोत्तमत्व
एवमहातात्पर्यंसर्वागमानां।तथाचोक्तंभगवता।द्वाविमौपुरुषौलोकेक्षरश्चाक्षरएवच। क्षरःसर्वाणिभूतानिकू
टस्थोक्षरउच्यते।उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदाहृतः। योलोकत्रयमविश्यबिभर्त्यव्ययईश्वरः।यस्मात्क्षरमती
तोहमक्षरादपिचोत्तमः।अतोस्मिलोकेवेदेचप्रथितःपुरुषोत्तमः । योमामेवमसंमूढोजानातिपुरुषोत्तमं। ससर्व
विद्भजतिमांसर्वभावेनभारत।इतिगुह्यतमंशास्त्रमिदमुक्तंमयानघ। एतद्बुद्ध्वाबुद्धिमान्स्यात्कृतकृत्यश्चभारते
ति।सर्वोत्कर्षेदेवदेवस्यविष्णोर्महातात्पर्यंनैवचान्यत्रसत्यं। अवांतरंतत्परत्वंतदन्यत्सर्वागमानांपुरुषार्थस्ततो
तइतिपैंगिश्रुतिः।मुख्यंचसर्ववेदानांतात्पर्यंश्रीपतेःपरं।उत्कर्षेतुतदन्यत्रतात्पर्यंस्यादवांतरमितिमहावाराहे ॥२६३॥
। युक्तंचविष्णोःसर्वोत्तमत्वएवमहातात्पर्यंसर्वागमानां। मोक्षोहिसर्वपुरुषार्थोत्तमः। धर्मार्थकामाःसर्वेपिननि

त्यामोक्षएवहि । नित्यस्तस्मात्तदर्थाययतेतमतिमान्नरइति भाल्लवेय श्रुतिः। अनित्यत्वात्सदुःखत्वान्नधर्माद्याः
परंसुखं । मोक्षएवपरानंदःसंसारेपरिवर्तताामितिभारते।मोक्षश्चविष्णुप्रसादेनविनानलभ्यते। यस्यप्रसादात्प
रमार्तिरूपादस्मात्संसारान्मुच्यतेनापरेण ।नारायणोसौपरमोविचिंत्योमुमुक्षुभिःकर्मपाशादमुष्मादितिना
रायणश्रुतिः।नायमात्माप्रवचनेनलभ्योनमेधयानबहुनाश्रुतेन ।यमेवैषवृणुतेतेनलभ्यस्तस्यैषआत्माविवृणुते
तनूंस्वामितिकठश्रुतिः ।तेषामहंसमुद्धर्तामृत्युसंसारसागरात्।भवामिनचिरात्पार्थमय्यावेशितचेतसामिति
भगवद्वचनं।उत्पत्तिस्थितिसंहारानियतिर्ज्ञानमावृतिः । बंधमोक्षौचपुरुषाद्यस्मात्सहरिरेकराडितिस्कांदे । अ
ज्ञानांज्ञानदोविष्णुर्ज्ञानिनांमोक्षदश्चसः । आनंददश्चमुक्तानांसएवैकोजनार्दनइतिच । बंधकोभवपाशेनभव
पाशाच्चमोचकः । कैवल्यदःपरंब्रह्मविष्णुरेवनसंशयइतिच । प्रीतिश्चगुणोत्कर्षज्ञानादेवविशेषतोदृष्टा । नाभे
दज्ञानात् । अभेदज्ञानादप्रीतिरेवोत्तमानांभवति । घातयंतिहिराजानोराजाहमितिवदंतं । ददतिचसर्वम
भिप्रेतंगुणोत्कर्षंवदतः ।नतादृशीप्रीतिरीड्यस्यविष्णोर्गुणोत्कर्षज्ञातरियादृशीस्यात्। तत्प्रीणनान्मोक्षमाप्नो
तिसर्वस्ततोवेदास्तत्परास्सर्वएवेतिसौपर्णश्रुतिः । योमामेवमसंमूढोजानातिपुरुषोत्तमं । ससर्वविद्भजतिमां

सर्वभावेनभारतेतिगुणोत्कर्षज्ञानादेवपरमाप्रीतिर्भगवतास्वयमेवाभिहिता।अतोविष्णोर्गुणोत्कर्षएवसर्वश्रु
तिस्मृतीनांमहातात्पर्यं।नचाभेदेतात्पर्यमित्यत्रकिंचिन्मानं । नचविशेषणविशेष्यतयाभेदसिद्धिः। विशेषण
विशेष्यभावश्चभेदापेक्षःधर्मिप्रतियोग्यपेक्षयाभेदसिद्धिः भेदापेक्षंचधर्मिप्रतियोगित्वमित्यन्योन्याश्रयतया
भेदस्यायुक्तिः।पदार्थस्वरूपत्वाद्भेदस्य । नचधर्मिप्रतियोग्यपेक्षयाभेदस्यास्वरूपत्वं। ऐक्यवत्स्वरूपस्यैवतथा
त्वात्। स्वरूपसिद्धावपितदसिद्धिश्चजीवेश्वरैक्यंवदतःसिद्धैव।भेदस्तुस्वरूपदर्शनएवसिद्धः।प्रायःसर्वतोविल
क्षणंहिपदार्थस्वरूपंदृश्यते।अस्यभेदइतितुपदार्थस्यस्वरूपमितिवत्।यदिनस्वरूपंभेदस्तदापदार्थेदृष्टेप्रायःस
र्वतोवैलक्षण्यंतस्यनज्ञायेत । अज्ञातेचवैलक्षण्येआत्मानिघटइत्यपिसंशयःस्यात्। नहिकश्चित्तथासंशयंकरो
ति।ज्ञात्वैवप्रायःसर्वतोवैलक्षण्यंकस्मिंश्चिदेवसदृशेसंशयंकरोति । नह्यात्मन्यहंदेवदत्तोनवेतिकस्यचित्संश
योभवति।सामान्यतःसर्ववैलक्षण्येज्ञातएवघटत्वादिज्ञानं। अतोनान्योन्याश्रयता।नचयुगपज्ज्ञानानुत्पत्ति
र्दोषः। यथायुगपदेवदीपसहस्रदर्शनेसामान्यतःसर्वेज्ञायंतएवतथास्यात् । एकस्मिन्नेववस्तुनिविशेषस्तैरप्यं
गीकृतएव।नेतिनेतीत्यत्रसर्ववैलक्षण्यांगीकारात्। विशेषानंगीकारेचपुनरुक्तेः।नचघटाद्वैलक्षण्यमेवपटाद्वै

लक्षण्यं। अनुभवविरोधात्। तस्माद्भेददर्शनंयुक्तमेव । यच्चप्रमाणदृष्टानामपिपदार्थानांमिथ्यात्वकल्पनंतच्च प्रमाणविरुद्धत्वादेवप्रकाशतस्करत्वं। नहिप्रमाणदृष्टस्यतर्कबाध्यत्वं। प्रत्यक्षादिविरुद्धानांतर्काभासत्वनियमात्।शुक्त्यादेरजतत्वादिप्रतीतेरपिबलवत्प्रत्यक्षविरुद्धत्वादेवभ्रमत्वंनतर्कमात्रात्।तर्कमात्रतःप्रत्यक्षबाधने भूतचतुष्टयस्याबादेःपृथिवीत्वादृष्टेःपृथिव्याअपिपृथिवीत्वंनस्यात् । अतोनतर्कमात्रतएवदृष्टस्यभ्रांतित्वंकल्प्यं।अतःसर्वभेदनिरासकतर्कस्यसर्वश्रुतिस्मृतिप्रत्यक्षानुमानविरुद्धत्वान्नितरामाभासत्वं।नचपरमार्थतोभेदाभावोव्यावहारिकःसोस्तीतिवाच्यं।सदसद्वैलक्षण्येप्रमाणाभावात्।असतःख्यात्ययोगादितिवदतःख्यातिरभून्नवा।यदिनाभून्नतत्ख्यातिनिराकरणं। यद्यभूत्तथापि।नचासतोवैलक्षण्यंतत्प्रतीतिंविनाज्ञायते। नचशुक्तेरजतत्वंसदसद्विलक्षणं। असदेवरजतंप्रत्यभादित्यनुभवात्। नचप्रतीतत्वादसत्त्वाभावः। असतःसत्त्वप्रतीतिःसतोसत्त्वप्रतीतिरित्यन्यथाप्रतीतेरेवभ्रांतित्वात्। नचासतोभ्रांतावपिप्रतीतिर्नास्तीतिवाच्यं।अनिर्वचनीयपरमार्थत्वस्यासतएवदृष्ट्यंगीकारात्। नचतदप्यनिर्वाच्यं। अनवस्थितेः।प्रथमानिर्वचनीयासिद्ध्यासर्वानिर्वचनीयासिद्धिरितिमूलक्षतिः । अनिर्वचनीयत्वेरजतस्यानिर्वचनीयमिदंरजतमितिबाधकज्ञानमुत्प

४५

द्येत । मिथ्याशब्दस्त्वभाववाची । नचसदसद्वैलक्षण्यंनामास्तीत्यत्रकिंचिन्मानं । अनुभवविरोधश्चतत्पक्षे ।
सदसतोर्द्वयोरेवसर्वैरनुभूयमानत्वात् । अतोऽनिर्वचनीयाभावादसतःप्रतीत्यनंगीकारात्प्रतीयमानत्वाच्चभेद
स्यसत्त्वप्राप्तेर्नाद्वितीयत्वंयुज्यते । कथंचश्रुतिसिद्धोजीवपरमात्मभेदोनिराक्रियते । मिथ्यावादित्वेचश्रुतेःक
थमैक्यस्यसत्यत्वं । कथंचैवंवादिनांवेदवादित्वं । वेदोक्तस्यमिथ्यात्वांगीकारादेवह्यवेदवादित्वंबौद्धादीनामपि ।
अतोविष्णोःसर्वोत्तमत्वएवमहातात्पर्यंसर्वागमानां । कथंचजीवपरमात्मैक्येसर्वश्रुतीनांतात्पर्यंयुज्यते । सर्व
प्रमाणविरुद्धत्वात् । तथाह्यनुभवविरोधः । नह्यहंसर्वज्ञःसर्वेश्वरोनिर्दुःखोनिर्दोषइतिवाकस्यचिदनुभवः । अस्ति
चतद्विपर्ययेणानुभवः । नचमिथ्यानुभवोयं । तद्विपरीतप्रमाणाभावात् । नचाभेदेकश्चिदागमः । संतिचभे
देसर्वागमाः । तथाह्यतत्त्वमसीतिनवकृत्वउपदेशःसदृष्टांतकः । नचायमभेदोपदेशः । सयथाशकुनिःसूत्रेण
प्रबद्धोदिशंदिशंपतित्वान्यत्रायतनमलब्ध्वाबंधनमेवोपाश्रयते । सन्मूलाःसोम्येमाःसर्वाःप्रजाःसदायतनाः
सत्प्रतिष्ठाः ॥ १ ॥ यथासोम्यमधुमधुकृतोनिस्तिष्ठंतिनानात्ययानांवृक्षाणांरसानांसमवहारमेकतांगमयंतितेय
थातत्रनविवेकंलभंतेऽमुष्याहंवृक्षस्यरसोस्म्यमुष्याहंवृक्षस्यरसोस्मीत्येवमेवखलुसोम्येमाःसर्वाःप्रजाःसतिसं

पद्यनविदुःसतिसंपत्स्यामहइति।तइहव्याघ्रोवासिंहोवावृकोवावराहोवाकीटोवापतंगोवादंशोवामशकोवाय
द्यद्भवंतितत्तदाभवंति ॥२॥ इमाःसोम्यनद्यःपुरस्तात्प्राच्यःस्यंदंतेपश्चात्प्रतीच्यस्ताःसमुद्रात्समुद्रमेवापियंति
समुद्रएवभवंति।तायथातत्रनविदुरियमहमस्मीयमहमस्मीति। एवमेवखलुसोम्येमाःसर्वाःप्रजाःसतआगम्य
नविदुःसतआगच्छामहइति । तइहव्याघ्रोवासिंहोवावृकोवावराहोवाकीटोवापतंगोवादंशोवामशकोवाय
द्यद्भवंतितत्तदाभवंति॥३॥सएषजीवेनात्मनानुप्रभूतःपेपीयमानोमोदमानस्तिष्ठति।अस्ययदेकांशाखांजीवो
जहात्यथसाशुष्यति ॥४॥ न्यग्रोधफलमतआहरेतीदंभगवइतिभिंधीतिभिन्नंभगवइतिकिमत्रपश्यसीत्यण्व्य
इवेमाधानाभगवइत्यासामंगैकांभिंधीतिभिन्नाभगवइतिकिमत्रपश्यसीतिनकिंचनभगवइति । तंहोवाचयंवै
सोम्यैतमणिमानंननिभालयसेअस्यसोम्यैषोणिम्नएवंमहान्न्यग्रोधस्तिष्ठति ॥५॥ लवणमेतदुदकेऽवधायाथमा
प्रातरुपसीदथाइतितद्धतथाचकारतंहोवाचयद्दोषालवणमेतदुदकेऽवधाअंगतदाहरेति।तद्धावमृश्यनविवेद
यथाविलीनमेवांगास्यांतदाचामेतिकथमितिलवणमितिमध्यादाचामेतिकथमितिलवणमितिअंत्यादाचामे
तिकथमितिलवणमितिअभिप्रास्यैतदथमोपसीदथाइतितद्धतथाचकारतच्छश्वत्संवर्तते । तंहोवाचात्रवाव

किलसत्सोम्यननिभालयसेत्रैवकिलेति॥६॥यथासोम्यपुरुषंगंधारेभ्योभिनद्धाक्षमानीयतंततोतिजनेविसृजे
त्॥७॥अथयदास्यवाङ्मनसिसंपद्यतेमनःप्राणेप्राणस्तेजसितेजःपरस्यांदेवतायांतावन्नजानाति॥८॥पुरुषंसो
म्योतहस्तगृहीतमानयंत्यपहार्षीत्स्तेयमकार्षीत्परशुमस्मैतपतेतिसयदितस्यकर्ताभवतिततएवानृतमात्मानं
कुरुतेसोनृताभिसंधोनृतेनात्मानमंतर्धायपरशुंतप्तंप्रतिगृह्णातिसदह्यतेथहन्यतेअथसयदितस्याकर्ताभवति
ततएवसत्यमात्मानंकुरुतेससत्याभिसंधःसत्येनात्मानमंतर्धायपरशुंतप्तंप्रतिगृह्णातिसनदह्यतेथमुच्यते ॥९॥
एवमेवखलुसोम्याचार्यवान्पुरुषोवेदेतिस्थाननवकेपिभेदएवदृष्टांताभिधानात्।नहिशकुनिसूत्रयोर्नानावृक्षर
सानांनदीसमुद्रयोर्जीववृक्षयोरणिमधानयोर्लवणोदकयोर्गंधारपुरुषयोरज्ञप्राणादिनियामकयोस्तेनापहार्य
योश्चैक्यं।सतिसंपद्यनविदुःसतिसंपत्स्यामहइतितइहव्याघ्रोवासिंहोवेतिसआगम्यनविदुःसतआगच्छामहइ
तितइहव्याघ्रोवासिंहोवेतिभेदापरिज्ञानानेनानर्थवचनाच्च।नहिगृहादागतस्यगृहेप्रविष्टस्यचतदैक्यं।ताःसमु
द्रात्समुद्रएवापियंतिससमुद्रएवभवतीत्यत्रापिभेदएवोच्यते।अन्यथातास्समुद्रएवभवंतीतिव्यपदेशःस्यात्।
अतोनद्यःसमुद्रादागच्छंतितंप्रविशंतिचसमुद्रस्तुसएवनैतासांसमुद्रत्वंभवतीत्यर्थः। नहिभिन्नानांनदीजलप

रमाणूनांसामुद्राणुभिरैक्यंयुज्यते । तथासतिमहाजनसमितौप्रविष्टानांद्वित्राणांतदैक्यंस्यात्।नचतद्युज्यते।
भेदेनानुभवात् । स्वंह्यपीतोभवतीत्यत्रापिस्वइतिपरमात्मनोभिधानं । स्वात्मनाचोत्तरयोरितिसूत्रात् । स्वातं
त्र्यात्स्वइतिप्रोक्तआत्मायंचाततत्वतः । ब्रह्मायंगुणपूर्णत्वाद्भगवान्विष्णुरव्ययइतिपरमोपनिषदि । अपीत
इत्यपिप्रवेशमात्रं। स्वमितिद्वितीयानिर्देशात्। एकीभावविवक्षायांस्वेनेतिनिर्देशःस्यात् ।स्वंकुलायंयथापीतः
पक्षीस्यादेवमीश्वरं। अप्येतिजीवःप्रस्वापेमुक्तौचान्योपिसन्सदेतिच।एवमेवखलुसोम्यैतन्मनोदिशंदिशंपति
त्वान्यत्रायतनमलब्ध्वाप्राणमेवोपाश्रयतइत्यत्रापिमनइतिजीवःप्राणइतिपरमात्मा । यत्रायंपुरुषःस्वपिति
नामेतितयोरेवप्रस्तुतत्वात् । मननान्मनउद्दिष्टःपुद्गलोनिरयंगिरन् । कर्मानुशयनाच्चैवसंसार्यनुशयीस्मृतइ
तिचपरमोपनिषदि । प्राणःप्रणयनादेषसाधुत्वात्सन्हरिःस्मृतइतिच । सन्मूलाःसोम्येमाःसर्वाःप्रजाःसदायत
नाःसत्प्रतिष्ठाइत्यत्रापिभेदएवप्रतीयते । स्रष्टृत्वादाश्रयत्वाच्चमुक्तानांचप्रतिप्रति । स्थापनाच्चविभुर्विष्णुरन्यः
संसारिणोमतइतिच । अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिसएषजीवेनात्मनानुप्रभूतःपेपी
यमानोमोदमानस्तिष्ठतीत्यत्रापिजीवशब्देनपरमात्माभिहितः । जीवइतिभगवतोऽनिरुद्धस्याख्येतिश्रुतेः ।

विष्णुर्जीवइतिप्रोक्तःसततंप्राणधारणात्। सप्रविश्यशरीरंचस्थावरंजंगमंतथा। महाभूतानिचविभुस्त्रिवृत्कर
णपूर्वकं। संसारिणंभ्रामयतिसदैवान्यत्वलक्षणं। तेनायंमोदतेनित्यंवृक्षावस्थांगतोपिसन्निति च। तत्तेजऐक्ष
तताआपऐक्षंतइमास्तिस्रोदेवताइतिपूर्वमेवचेतनत्वसिद्धेरनेनजीवेनात्मनेतिसंसारिणःपुनःप्रवेशोनयुक्तः।
अतस्तत्रजीवशब्देनपरमात्मैवाभिहितः। जीवेनात्मनानुप्रभूतःपेपीयमानोमोदमानस्तिष्ठतीत्यत्रापिजीवश
ब्दोदितःपरएव। पेपीयमानोमोदमानस्तुसंसारी। नहिचेतनादन्यस्यमोदभोगादिकंयुज्यते। सुखस्यचाप्या
यतनंशरीरंदुःखस्यचाप्यायतनंशरीरं। अचेतनंप्राकृतमेतदाहुर्भोक्तातयोश्चेतनकःशरीरीतिचभारते। जी
वापेतंवावकिलेदंम्रियतेनजीवोम्रियतइत्यत्रापिजीवशब्दःपरे। नहिसंसारिणोमुख्यतःप्राणधारकत्वंयुज्यते।
ब्रह्मणात्यक्तदेहस्तुमृतइत्युच्यतेनरइतिच। यंवैसोम्यैतमणिमानंननिभालयसेऽस्यसोम्यैषोऽणिम्नएवंमहान्य
ग्रोधस्तिष्ठतीत्यत्राप्यणिमशब्देनपरएवाभिहितः। सएषोणिमैतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसिश्वेत
केतोइत्युक्तत्वाच्च।धानासुत्वण्व्यइवेमाधानाइतिस्त्रीलिंगप्रयोगादिवशब्दप्रयोगाच्चनाणिमत्वं।नचतानननिभा
लयसे।ऐतदात्म्यमित्येतदीयं।सआत्मेत्यात्मशब्दस्तुपरएव। द्युभ्वाद्यायतनंस्वशब्दात्।नानुमानमतच्छब्दात्।

प्राणभृच्चेत्यत्रतमेवैकंजानथआत्मानमितिस्वशब्दपर्यायात्मशब्दान्नप्रकृतिजीवावभिधीयेतेकिंतुपरएवेतिभ
गवताव्यासेनाभिहितं।अतआत्मशब्दस्तस्मिन्नेवमुख्यः।आततत्वाच्चमातृत्वादात्मेतिपरमोहरिः।आत्माभा
सास्तदन्येयेनह्येतेषांतताागुणाइतिपरमोपनिषदि।तेजःपरस्यांदेवतायांतावन्नजानातीत्यत्रचयदास्यप्राणा
दीन्परोग्रसतितदानजानातियदाददातितदाजानातीतितद्वशत्वमेवोक्तं।यदाप्राणान्ददातीशस्तदाचेतन
कोखिलं।जानातिग्रस्तकरणस्तेनवेत्तिनकिंचनेतिच।अपहार्षीत्स्तेयमकार्षीदित्यत्रचान्याभिमतस्यैववस्तुनो
पहार्यत्वाद्भेदएवायंदृष्टांतः।अन्यंसंतंपरमात्मानंस्वयमितिमन्यमानस्तेनएवेति।नहिस्वकीयंपरित्यजंस्तेनोभ
वति।ऐकात्म्यंनामयदिदंकेचिद्ब्रूयुरनैपुणाः।शास्त्रतत्त्वमविज्ञायतथावादबलाजनाः।कामक्रोधाभिभूतत्वाद
हंकारवशंगताः।याथातथ्यमविज्ञायशास्त्राणांशास्त्रदस्यवः।ब्रह्मस्तेनानिरानंदाअपक्कमनसोशिवाः।वैगुण्य
मेवपश्यंतिनगुणानिनियुंजते।तेषांतमश्शरीराणांतमएवपरायणं।यतःस्वरूपतश्चान्योजातितःश्रुतितोर्थ
तः।कथमस्मिसइत्येवसंबंधःस्यादसंहितइतिमोक्षधर्मे।यथापक्षीचसूत्रंचनानावृक्षरसायथा।यथानद्यःसमु
द्रश्चशुद्धोदलवणेयथा।यथाचोरापहार्यौचयथापुंविषयावपि।तथाजीवेश्वरौभिन्नौसर्वदैवविलक्षणौ।तथापि

सूक्ष्मरूपत्वान्नजीवात्परमोहरिः। भेदेनमंददृष्टीनांदृश्यतेप्रेरकोपिसन्। वैलक्षण्यंतयोर्ज्ञात्वामुच्यतेबध्यतेन्यथे
तिचपरमोपनिषदि। प्रेरकःसर्वजीवानांप्राणधीचोदिताचसः। विष्णुस्संसारिणोन्योयस्तमविज्ञायमूढधीः।
देहेंद्रियप्राणबुद्धिनेतृत्वंमन्यतेत्मनः। अतःसंसारपदवींयातिजीवेशयोःसदा। वैलक्षण्यंपरंज्ञात्वामुच्यतेब
ध्यतेन्यथेतिच। सर्वान्वेदानधीत्यमहामनाअनूचानमानीस्तब्धएयायेत्यात्मनोन्यमनूचानत्वादिगुणप्रदंपर
मविज्ञायस्तब्धस्यपराधीनत्वज्ञापनेनस्तब्धतांनिरस्यतन्निष्ठाह्यत्रोपदिश्यते। तद्धैकआहुरसदेवेदमग्रआसी
दित्यादिवादिप्रसिद्धमपिनिराक्रियते। इष्टापूर्तंमन्यमानावरिष्ठंनान्यच्छ्रेयोवेदयंतेप्रमूढाइत्यादिवच्छ्रुतिता
त्पर्यापरिज्ञानप्राप्तंच। दर्शितंचैकात्म्यंनामयदिदंकेचिद्ब्रूयुरनैपुणाइति। तद्वशत्वज्ञापनार्थंचसदेवसोम्येदमग्र
आसीदित्यादिसृष्टिकथनं। एकविज्ञानेनसर्वविज्ञानंचप्राधान्यात्किंचित्सादृश्यात्कारणत्वाच्च। नतुतदन्यस्य
मिथ्यात्वात्। नहिसत्यज्ञानेनमिथ्याज्ञानंभवति। नहिशुक्तिज्ञोरजतज्ञइत्युच्यते। विरोधात्तयोर्ज्ञानयोः।
नेदंरजतमित्यरजतज्ञोहिशुक्तिज्ञोभवति। रजतज्ञश्चेन्नशुक्तिज्ञः। नहितज्ज्ञस्तदभावज्ञोभवति। तदभावस्यत
ज्ज्ञानपूर्वकत्वंचान्यत्रतस्यसत्त्वादेवदृष्टं। तदनंगीकारेतदेवनयुज्यते। प्रधानज्ञानादप्रधानस्यज्ञातवद्व्यपदेशो

स्त्येव। यथाप्रधानपुरुषाणांज्ञानाह्वाननाशनैर्ग्रामोज्ञातआहूतोनाशितइतिव्यपदेशः । कारणेचपितरिज्ञातेपु
त्रोज्ञातइति । जानाम्येनमस्यपुत्रोयमितिव्यपदेशइति । एवमत्राप्येतत्सृष्टंसर्वमित्यादि । सादृश्याच्चैकस्त्रीज्ञा
नादन्यस्त्रीज्ञानमिति । तदेवसादृश्यमत्रापिविवक्षितंयथासोम्यैकेनमृत्पिंडेनसर्वंमृण्मयंविज्ञातंस्यादित्यादि
ना।अन्यथैकशब्दःपिंडशब्दश्चव्यर्थःस्यात्।मृदाविज्ञातयेत्येतावतापूर्णत्वात्। नह्येकमृत्पिंडात्मकान्यमृण्मया
नि।सादृश्यमेवहितेषां। यथासोम्यैकेनलोहमणिनासर्वंलोहमयंविज्ञातंस्यात् । यथासोम्यैकेननखनिकृंतनेन
सर्वंकार्ष्णायसंविज्ञातंस्यादित्यादिकमपिव्यर्थंस्यात् । नह्येकमण्यात्मकमन्यल्लोहमयं।नचैकनखनिकृंतनात्म
कंसर्वंकार्ष्णायसं। वाचारंभणंविकारोनामधेयंमृत्तिकेत्येवसत्यमित्यत्रवाचानाम्नामारंभणंविकारःअविकृतं
नित्यंनामधेयंमृत्तिकेत्येवेत्येतद्वचनंसत्यमितिश्रुत्यर्थः। नचवाचारंभणशब्दोपिमिथ्यात्वेप्रसिद्धः । वाचारंभ
णमात्रमितिचाश्रुतकल्पनं। तस्मिन्पक्षेनामधेयशब्दइतिशब्दश्चव्यर्थःस्यात् । अतोनकुत्रापिजगतोमिथ्या
त्वमुच्यते। कविर्मनीषीपरिभूःस्वयंभूर्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीभ्यःसमाभ्यः । यच्चिकेतसत्यमित्तन्न
मोघंवसुस्पार्हमुतजेतोतदाता। विश्वंसत्यंमघवानायुवोरिदापश्चनप्रमिनंतिव्रतंवां। प्रधान्वस्यमहतोमहानि

सत्यासत्यस्यकरणानिवोचं। अनाद्यनंतंजगदेतदीदृक्प्रवर्ततेनात्रविचार्यमस्ति। नचान्यथाक्कापिचकस्यचे
दमभूत्पुरानापितथाभविष्यत्। असत्यमाहुर्जगदेतदज्ञाःशक्तिंहरेर्येनविदुःपरांहि। यःसत्यरूपंजगदेतदीदृ
क्सृष्टवात्वभूत्सत्यकर्मामहात्मा। असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरं। अपरस्परसंभूतंकिमन्यत्कामहैतुकं। एतां
दृष्टिमवष्टभ्यनष्टात्मानोल्पबुद्धयः। प्रभवंत्युग्रकर्माणःक्षयायजगतोऽहिताइत्यादेश्च। अनित्यत्वविकारित्व
पारतंत्र्यादिरूपतः। स्वप्नादिसाम्यंजगतोनतुबोधनिवर्त्यता। सर्वज्ञस्ययतोविष्णोःसर्वदैतत्प्रतीयते। बोधा
सहंततोनैतात्किंत्वाज्ञावशमस्यहीतिपरमोपनिषदि। प्रज्ञाविनिर्मितंयस्मादतोमायामयंजगत्। अनेनानुग
तंयस्मादनृतंतेनकथ्यते। बोधानिवर्त्यमपितुनित्यमेवप्रवाहतः। अइत्युक्तःपरोदेवस्तेनसत्यमिदंजगत्। तद
धीनस्वरूपत्वादसत्यंतेनकथ्यते। सत्यस्यसत्यःसविभुरिंद्रचापस्यसूर्यवदितिच। तस्योपनिषत्सत्यस्यसत्यमि
तिप्राणावैसत्यंतेषामेषसत्यमितिच। महामायेत्यविद्येतिनियतिर्मोहिनीतिच। प्रकृतिर्वासनेत्येवंतवेच्छानंत
कथ्यते। प्रकृतिःप्रकृष्टकरणाद्वासनावासयेद्यतः। अइत्युक्तोहरिस्तस्यविद्याऽविद्येतिसंज्ञिता। मायेत्युक्ताप्र ॥२६९॥
कृष्टत्वात्प्रकृष्टंहिमयाभिधं। विष्णोःप्रज्ञप्तिरेवैकाशब्दैरेतैरुदीर्यते। प्रज्ञप्तिरूपोहिहरिःसाचस्वानंदलक्षणेतिच।

सर्वेवेदाहरेर्भेदंसर्वस्माज्ज्ञापयंतिहि। भेदःस्वातंत्र्यसार्वज्ञसर्वैश्वर्यादिकश्चसः। स्वरूपमेवभेदोयंव्यावृत्तिश्चस्व
रूपता। सर्वत्वावृत्तयेयस्मात्स्वशब्दोयंप्रयुज्यते। सर्वव्यावृत्ततामेवनेतिनेत्यादिकाश्रुतिः। विष्णोरतोवदेद
न्याअपिसर्वानसंशयइतिनारायणश्रुतिः। अहंब्रह्मास्मितद्योहंसोसौयोसौसोहंयोसावादित्येपुरुषःसोहमस्मि
सएवाहमस्मीत्यादित्वंतर्याम्यपेक्षया। सयश्चायंपुरुषेयश्चासावादित्येसएकः।अइतिब्रह्मतत्रागतमहमिति।
तस्योपनिषदहमिति। अहंनामाहरिर्नित्यमहेयत्वात्प्रकीर्तितः। त्वंचासौप्रतियोगित्वात्परोक्षत्वात्सइत्यपि।
सर्वांतर्यामिणिहरावस्मच्छब्दविभक्तयः। युष्मच्छब्दगताश्चैवसर्वास्तच्छब्दगाअपि। सर्वशब्दगताश्चैववचना
न्यखिलान्यपि। स्वतंत्रत्वात्प्रवर्ततेव्यावृत्तेप्यखिलात्सदा। तत्संबंधात्तुजीवेषुतत्संबंधादचित्स्वपि। वर्ततउप
चारेणतिङ्पदान्यखिलान्यपि। तस्मात्सर्वगतोविष्णुरेकोभिन्नततोबहुरितिनारायणश्रुतिः।सर्वभूतेषुयेनैकं
भावमव्ययमीक्षते। अविभक्तंविभक्तेषुतज्ज्ञानंविद्धिसात्त्विकमितिभगवद्वचनं। नचासत्योभेदः। सत्यमेनम
नुविश्वेमदंतिरातिंदेवस्यगृणतोमघोनः।सत्यःसोअस्यमहिमागृणेशवोयज्ञेषुविप्रराज्ये। सत्यआत्मासत्योजी
वःसत्यंभिदासत्यंभिदासत्यंभिदामैवारुवण्योमैवारुवण्योमैवारुवण्यः। आत्माहिपरमस्वतंत्रःसर्ववित्सर्वश

विष्णुत. क्तिःपरमसुखःपरमोजीवस्तुतद्वशोल्पज्ञोल्पशक्तिरार्तोल्पकइत्यादिश्रुतिभ्यः।नचावांतरसत्यत्वमिदं। योवेद विनि.
॥ १२ ॥ निहितंगुहायांपरमेव्योमन्।सोश्नुतेसर्वान्कामान्सहब्रह्मणाविपश्चिता।एतमानंदमयमात्मानमुपसंक्रम्यइमा प० १
न्लोकान्कामान्नीकामरूप्यनुसंचरन्।एतत्सामगायन्नास्ते।ऋचांत्वःपोषमास्तेपुपुष्वान्गायत्रंत्वोगायतिशक्क
रीषु।ब्रह्मात्वोवदतिजातविद्यांयज्ञस्यमात्रांविमिमीतउत्वः।परंज्योतिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यते। सत
त्रपर्येतिजक्षन्क्रीडन्रममाणःस्त्रीभिर्वायानैर्वाज्ञातिभिर्वाऽज्ञातिभिर्वा। यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्ये
त्तत्केनकंजिघ्रेत्तत्केनकंविजानीयाद्येनेदंसर्वंविजानातितंचकेनविजानीयाद्विज्ञातारमरेकेनविजानीयात्।
यथोदकंशुद्धेशुद्धमासिक्तंतादृगेवभवति।तदाविद्वान्पुण्यपापेविधूयनिरंजनःपरमंसाम्यमुपैति।अमृतस्यैष
सेतुः।अक्षण्वंतःकर्णवंतःसखायोमनोजवेष्वसमाबभूवुः।आदघ्नासउपकक्षासउत्वेह्रदाइवस्नात्वाउत्वेदद्दश्रे।ई
शमाश्रित्यतिष्ठंतिमुक्ताःसंसारसागरात्।यथेष्टभोगभोक्तारोब्रह्मांताउत्तरोत्तरमितिमोक्षानंतरंभेदश्रुतिभ्यः
।इदंज्ञानमुपाश्रित्यममसाधर्म्यमागताः। सर्गेपिनोपजायंतेप्रलयेनव्यथंतिचेतिभगवद्वचनं।ॐजगद्व्यापार ॥२७०॥
वर्जं।ॐप्रकरणादसन्निहितत्वाच्चेत्यादिच। अविनाशीवाअरेऽयमात्मानुच्छित्तिधर्मेतितद्धर्माणामप्यनुच्छि

त्तेःप्रस्तुतत्वादत्रैवमाभगवान्मोहांतमापिपन्नप्रेत्यसंज्ञास्तीतिसंज्ञानाशस्यदोषत्वेनोक्तत्वात् । यत्रत्वस्यसर्व
मात्मैवाभूत्तत्केनकंपश्येदितिह्याक्षेपएव। नहिभोगाभावोविज्ञातारमरेकेनविजानीयादितिविज्ञातुरविज्ञानं
चापेक्षितं। अहमित्येवयोवेद्यःसजीवइतिकीर्तितः ।सदुःखीससुखीचैवसपात्रंबंधमोक्षयोरितिपरमश्रुतिः ।
मग्नस्यहिपरेऽज्ञानेकिंनदुःखतरंभवेदितिमोक्षधर्मे । नतुतद्वितीयमस्तीतिच। यत्तद्ब्रह्मद्वैतत्वेननपश्यतितदेव
द्वितीयंनेत्याह। यत्ततोन्यद्विभक्तत्वेनैवपश्येदितिवाक्यशेषात्। नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतइतिहेतोश्च ।
कर्माणिविज्ञानमयश्चआत्मापरेव्ययेसर्वएकीभवंतीत्यत्राप्येकीभावोमत्यैक्यंक्षीराब्ध्यादिस्थिततद्रूपापेक्षया
स्थानैक्यंवा। कामेनमेकामआगाद्धृदयाद्धृदयंमृत्योः ।यदमीषामदःप्रियंतदेतूपमामभि । ब्रह्ममत्यनुकूलामे
मतिर्मुक्तौभविष्यति। अतःप्रायोनुकूलत्वमिदानीमपिसंस्थितं । येनाक्रमंत्यृषयोह्याप्तकामायत्रतत्सत्यस्यप
रमंनिधानं । एतमानंदमयमात्मानमुपसंक्रामतीत्यादिश्रुतिभ्यः । स्वरूपैक्याभिप्रायेकर्माणिविज्ञानमयश्चे
तिनयुज्यते । नहितत्पक्षेपिकर्मणांब्रह्मैक्यंमुक्तावस्ति । निवृत्त्यभिप्रायेचपंचदशकलानामपिसमत्वात् ग
ताःकलाःपंचदशप्रतिष्ठादेवाश्चसर्वेप्रतिदेवतास्वित्यन्यासांकलानांगमनमुक्त्वाकर्मणांविज्ञानात्मनश्चैकीभाव

कथनव्यर्थंस्यात्। विशेषाभावात्। नचज्ञाननिवृत्तस्यरजतस्यशुक्त्यैकीभावव्यवहारोस्ति। परेव्ययइत्यधिकर
णत्वकथनंचभेदज्ञापकं । अन्यथापरएवभवतीतिनिर्देशःस्यात् । जीवस्यपरमैक्यंतुबुद्धिसारूप्यमेवतु । ए
कस्थाननिवासोवाव्यक्तिस्थानमपेक्ष्यसः। नस्वरूपैकतातस्यमुक्तस्यापिविरूपतः । स्वातंत्र्यपूर्णतेल्पत्वपार
तंत्र्येविरूपतेतिपरमश्रुतिः। ब्रह्मवेदब्रह्मैवभवतीत्यादिच संपूज्यब्राह्मणंभक्त्याशूद्रोपिब्राह्मणोभवेदितिवत् ।
बृंहितोभवतीत्यर्थः । नहिब्राह्मणपूजकःसएवब्राह्मणोभवति । ब्रह्माणिजीवाःसर्वेपिपरब्रह्माणिमुक्तिगाः । प्र
कृतिःपरमंब्रह्मपरमंमहदच्युतः । तस्मान्नमुक्तानचसानकश्चिद्विष्णुवैभवं। प्राप्नुवंतिसएवैकःस्वतंत्रःपूर्णषड्गुण
इतिपरमश्रुतिः । परोमात्रयातन्वावृधानन्नतेमहित्वमन्वश्नुवंति। ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुंनैवशक्यते । त
द्यत्स्वभावःकैवल्यंसभवान्केवलोहरइतिच।यथापियंतितेजांसिमहातेजसिभास्करे । पृथक्पृथक्स्थितान्यद्धि
स्वरूपैरपिसर्वशः।परेब्रह्मणिजीवाख्यब्रह्माण्यप्यपियंतिहि। मुक्तौपृथक्स्थितान्येवतदन्येषामदर्शनं । अप्य
योयंसमुद्दिष्टोनस्वरूपैकताक्वचिदितिनारायणश्रुतिः । अतःसर्वागमविरुद्धमेवजीवेश्वरैक्यं । तथैवसर्वयु
क्तिविरुद्धंच । नतावदेकजीववादोयुज्यते । एकाज्ञानपरिकल्पितत्वेचसर्वस्यसर्वमिदंपरिकल्पितमितिजा

नतःपुनःशिष्यादिबोधनंनयुज्यते। नहिस्वप्नोयमितिनिश्चित्यस्वाप्नपुत्रदायार्थंयतते। स्वप्नेतुस्वाप्नत्वाज्ञाना देवयतते। नचबहूनांदृश्यमानत्वादस्याज्ञानपरिकल्पितमिदमितिनिश्चयोयुज्यते। स्वप्नेतुप्रबोधानंतरमेक स्यावशिष्टत्वान्निश्चयः। नचात्रतथास्ति। तस्यतस्यतथातथाप्रतिपत्तव्यमित्यंगीकारेवस्तुनिविकल्पासंभवा दकल्पितमित्येवस्यात्। नचतथाप्रतिपत्तव्यमित्यत्रप्रमाणमस्ति। शिष्याज्ञानपरिकल्पितमित्यंगीकारेतस्यै वाचार्यभावेस्वयमेवकल्पितोभवतीतिसम्यग्ग्रंथाधिगमस्यैवानर्थहेतुत्वंस्यात्। नचकस्यचिन्मुक्तिः। ग्रंथाधि गमेतस्यैवशिष्याज्ञानपरिकल्पितत्वप्राप्तेः। सचैकोजीवोयदिभेदवादीभवतितस्यतत्रैवदार्ढ्यान्नकदाचिद्भेद निवृत्तिरितिनकस्यापिमुक्तिःस्यात्। तेनयथाकल्पितंतथैवभवतीतितेनैकजीववादिनांनित्यनिरयकल्पनेसए वस्यात्। नचैकजीवाज्ञानपरिकल्पितंसमस्तमित्यत्रकिंचिन्मानं। प्रपंचोयदिविद्येतनिवर्तेतनसंशयः। मा यामात्रमिदंद्वैतमद्वैतंपरमार्थतइत्यस्यचायमर्थः। प्रपंचोयदिविद्येतभवेतउत्पद्येततर्हिनिवर्तेतनचनिवर्ततेत स्मादनादिरेवायं। प्रकृष्टःपंचविधोभेदःप्रपंचः। नचाविद्यमानोयं। मायामात्रत्वात्। मायेतिभगवत्प्रज्ञासै वमानत्राणकर्त्रीयस्यतन्मायामात्रं। परमेश्वरेणज्ञातत्वाद्रक्षितत्वाच्चनद्वैतंभ्रांतिकल्पितमित्यर्थः। नहीश्वरस्य

भ्रांतिः । तर्ह्यद्वैतःसर्वभावानामितिव्यपदेशःकथमित्यतआह । अद्वैतंपरमार्थतइति । परमार्थापेक्षयाह्यद्वैतं सर्वस्मादुत्तमोर्थःसएकएवेत्यर्थः । अन्यथाऽद्वैतःसर्वभावानामितिव्यर्थंस्यात् । सर्वभावानांमध्येतस्यैकस्यैवा द्वैतत्वमित्युक्तेसमाधिकराहित्यमेवोक्तंस्यात् । अन्येषांसमाधिकभावः । विकल्पोविनिवर्तेतकल्पितोयदिकेन चिदितिवाक्यशेषाच्चनकल्पितत्वमस्येतिज्ञायते । निवर्ततइत्यंगीकारेनिवर्तेतविद्येतेतिचप्रसंगरूपेणकथनंय दिशब्दोचनयुज्यंते । विद्येतेत्यस्यचोत्पत्त्यर्थानंगीकारेयद्यदस्तितत्तन्निवर्ततइतिव्याप्त्यभावान्निवर्तेतेतिनयु ज्यते । अतःप्रपंचस्यानादिसत्यत्वपरमिदंवाक्यं । अतःउपदेशादयंवादोऽज्ञातेद्वैतंनविद्यतइत्याह । अज्ञात एवद्वैतंनविद्यते । अज्ञानिनांपक्षएवद्वैतंनविद्यतइत्यर्थः । जीवेश्वरभिदाचैवजडेश्वरभिदातथा । जीवभेदोमि थश्चैवजडजीवभिदातथा । मिथश्चजडभेदोयंप्रपंचोभेदपंचकः । सोयंसत्योह्यनादिश्चसादिश्चेन्नाशमाप्नुयात् । नचनाशंप्रयात्येषनचासौभ्रांतिकल्पितः । कल्पितश्चेन्निवर्तेतनचासौविनिवर्तते । द्वैतंनविद्यतइतितस्मादज्ञा निनांमतं । मतंहिज्ञानिनामेतन्मितंत्रातंचविष्णुना । तस्मात्सत्यमितिप्रोक्तंपरमोहरिरेवत्वितिपरमश्रुतिः । मैत्रेयीशाखायांच । अथज्ञानोपसर्गाइत्युक्त्वाअथयेचान्येमिथ्यातर्कैर्दृष्टांतैःकुहकेंद्रजालैर्वैदिकेषुपरिस्थातुमि

च्छंतितैःसहनसंवसेत्प्राकाश्याह्येतेतस्करा अस्वर्ग्याइत्याह । नैरात्म्यवादकुहकैर्मिथ्यादृष्टांतहेतुभिः । भ्राम्यँ
ल्लोकोनजानातिवेदविद्यांतरंतुयदिति । आत्मसंबंधिकिमपिनास्तीतिवादोनैरात्म्यवादः । भ्रांतिकल्पितत्वेच
जगतःसत्यंजगद्वयमपेक्षितं । नहिसत्यशुक्तेःसत्यरजतस्यतयोःसादृश्यस्यचाभावेभ्रांतिर्भवति । स्वप्नेपिवास
नारूपंसत्यमेवजगन्मनसिस्थितंबहिष्ठत्वेनदृश्यते । देहात्मनोरप्येकदेशस्थत्वादिसादृश्यमस्त्येव । शंखःपीतो
नभोनीलमित्यादिष्वपिपीतादयोन्यत्रविद्यंतएव । तत्सादृश्यंचद्रव्यत्वादिकंकिंचिच्छंखादीनांचास्त्येव । अतो
नकुत्रापिसदृशसत्यवस्तुद्वयंविनाभ्रमः । नचात्मन्यनात्मभ्रमःक्वापिदृष्टः । नहिकश्चिदहमहंनभवामीतिभ्रां
तोदृश्यते । आत्मन्यनात्मभ्रमएवायंप्रपंचइतितैरुच्यते । तंविनैवानात्मन्यात्मभ्रमकल्पनेऽनात्मनस्सत्य
त्वंस्यात् । तदाचाद्वितीयत्वकल्पनेऽनात्मैवास्तिनात्मेतिभवति । आत्माज्ञानात्मकत्वेचजगतआत्मनोभिन्न
त्वेननदृश्येत । नहिशुक्तेर्भेदेनरजतंदृश्यतेभ्रांतौ । नचैकमेवयुगपद्बहुधादृश्यतेभ्रांतौ । नचात्मनिभेदभ्रमः
क्वापिदृष्टः । नचकुत्रापिमिथ्योपाधिकृतोभेदोदृष्टः । नचज्ञानाज्ञानयोरपिमिथ्याकल्पितत्वंदृष्टं । तद्विषय
स्यैवान्यथात्वंभ्रांतौ । एवमाद्यनंतयुक्तिविरुद्धोयंपक्षः । ग्रंथबहुत्वंस्यादित्येवोपरम्यते । नचसत्यत्वांगीका

रेकश्चिद्दोषः।बहुजीववादिपक्षेपिभेदस्यमिथ्यात्वांगीकारेएतेदोषाभवंत्येव। मिथ्योपाधिकृतंहितेषामपिबहु
त्वं।नचमिथ्योपाधिकृतोभेदःक्वापिदृष्टः। आत्मन्यनात्मकल्पनारूपत्वान्मिथ्योपाधिरेवनयुज्यते।मायामयी
सृष्टिरपितत्सदृशस्यान्यस्यविद्यमानत्वएवदृष्टा। द्रव्यत्वादिसादृश्ययुतंकिंचिदधिष्ठानमाश्रित्यैवच।अधिष्ठा
नंचसदृशंतथ्यवस्तुद्वयंविना। नभ्रांतिर्भवतिक्वापिस्वप्नमायादिकेष्वपि । मानस्यांवासनायांतुबहिर्वस्तुत्वक
ल्पनं। स्वाप्नोभ्रमश्चमायायांकर्तृदेहादिवस्तुषु। चतुरंगबलत्वादिकल्पनंभ्रमइष्यते। नभ्रांतिकल्पितंविश्वम
तोविष्णुबलाश्रयमितिब्रह्मवैवर्ते। नचमायाविनामायादृश्यतेविश्वमीश्वरः। सदापश्यतितेनेदंनमायेत्यव
धार्यतामितिच।अपरोक्षदृशोमिथ्यादर्शनंनक्वचिद्भवेत्। सर्वापरोक्षविद्विष्णुर्विश्वदृक्तन्नतन्मृषेतिच। यदि
चैकमेवब्रह्मोपाधिभेदात्संसरतिमुच्यतेचतदासंसारिणांसर्वदाविद्यमानत्वात्सर्वदासंसार्येवब्रह्म। अतस्तद्वा
वोपिनमुक्तिः। सर्वदोपाधिसंबद्धत्वात्तस्य। नचशुद्धस्यनोपाधिसंबंधइतिवाच्यं।उपाधिसंबद्धस्योपाधिसंबं
धकल्पनेनवस्थाप्रसंगात्। नचतेनैवसंबंधेनसंबद्धस्य। आत्माश्रयप्रसंगात्। इतश्चमिथ्योपाधिर्नयुज्यते।
अज्ञानसिद्धौमिथ्योपाधिसिद्धिः। अज्ञानंविनामिथ्यात्वासिद्धेः। नचमिथ्योपाधिंविनाऽज्ञानसिद्धिः।

मिथ्योपाधिभिन्नस्यैवाज्ञत्वात् । शुद्धस्यैवाज्ञत्वेमुक्तस्याप्यज्ञत्वप्रसक्तेः । स्वाभाविकत्वात्सत्यत्वात्सद्वितीय त्वप्रसक्तेश्च । स्वाभाविकस्यचनिवृत्त्यंगीकारादनिवृत्तिप्रसक्तेश्च । सत्यस्यचानिवृत्तिरितिहितत्पक्षः । अ तश्चान्योन्याश्रयता । अज्ञानसिद्धौमिथ्योपाधिसिद्धिःमिथ्योपाधिसिद्धौजीवसिद्धिःजीवसिद्धौतदाश्रया ज्ञानसिद्धिरितिचक्रकंवा । नचशुद्धमेवभ्रांत्याऽज्ञमितियुक्तं । अज्ञानसिद्धौभ्रमसिद्धिःतत्सिद्धावज्ञानसिद्धि रित्यन्योन्याश्रयत्वात् । अनागताअतीताश्चयावंतःसहिताःक्षणाः । अतीतानागताश्चैवयावंतःपरमाणवः । ततोप्यनंतगुणिताजीवानांराशयःपृथगितिवत्सश्रुतेर्नसंसारिणांपरिसमाप्तिरस्मत्पक्षे । परमाणुप्रदेशेपिह्यनं ताःप्राणिराशयः । सूक्ष्मत्वादीशशक्त्यैवस्थूलाअपिहिसंस्थिताः । सहस्रयोजनसभांप्रभावाद्विश्वकर्मणः । अनंताराशयोऽनंताःप्रजानामधिसंस्थिताइतिस्कांदे । नचमिथ्यावस्तुनोदुर्घटत्वमेवभूषणं । दृष्टस्यवस्तुनो मिथ्यात्वकल्पनस्यदृष्टिसकाशाद्बलवत्प्रमाणयुक्त्यपेक्षत्वात् । तदभावेसत्यत्वंदृष्ट्यैवसिध्यति । नह्यन्नादि कंभोग्यंदृष्ट्वाभोक्तुंसत्यत्वेप्रमाणांतरमपेक्षते । किंतुनेदमन्नमितिकेनचिदुक्तेकथमिदमन्नत्वेनदृश्यमानमन्नंन भवतीतिप्रमाणांतरमपेक्षते । नचप्रत्यक्षदृष्टस्यततोबलवत्प्रत्यक्षमागमंविनानुमानादिनैवबाधोदृष्टः । दूरस्थ

वृक्षह्रस्वत्वादौप्रत्यक्षापटुत्वस्यनिश्चितत्वाद्युक्त्यातत्रदीर्घत्वनिश्चयः । प्रत्यक्षस्यहिदूरेमंदग्राहित्वंपरिमाणा
दावन्यथात्वंचततोबलवत्प्रत्यक्षेणैवनिश्चितं।नचजगत्प्रत्यक्षस्यमिथ्यात्वंकेनापिप्रमाणेननिश्चितं। विशेषतश्च
ज्ञानाज्ञानसुखदुःखात्मभेदादिविषयस्यानुभवस्यनमिथ्यात्वंदृष्टं।अतश्चसंसारस्यसत्यत्वात्सत्यस्यचानिवृत्त्यं
गीकारान्नमोक्षःस्यात् । अनुभवसिद्धस्यबलवदनुभवंविनायुक्तितएवमिथ्यात्वांगीकारेआत्मनोपिमिथ्यात्वं
स्यात्। युक्तिश्च। सर्वस्यान्यस्यमिथ्यात्वांगीकारात्। द्विधाकल्पनेकल्पनागौरवमिति । आत्माधिष्ठानभ्रम
स्यैवादृष्टेस्तस्याधिष्ठानत्वमपिनयुज्यते।दुर्घटत्वस्यभूषणत्वेदुर्घटमप्यात्ममिथ्यात्वंस्यादेव। प्रतीतेरप्यविद्या
कार्यत्वांगीकारात्।तस्याश्चदुर्घटत्वस्यभूषणत्वात्सत्यस्यचयुक्त्यपेक्षत्वाद्धटादीनांद्रष्टृत्वमात्मनश्चजडत्वंद्रष्टु
रभावेचप्रतीतिरधिष्ठानंविनैवभ्रमइत्यादिविरुद्धंसर्वमपिस्यात्।उपाधिभेदांगीकारेहस्तपादाद्युपाधिभेदेपित
द्गतसुखदुःखादिभोक्तुर्यथाभेदोनप्रतीयतेएवमेवशरीरादिभेदेभोक्तुर्भेदोनदृश्येत। सर्वदेहगतसुखदुःखादि
कमेकेनैवभुज्येत । यथाचैकांगुल्याद्यपगमेपिनमुक्तिःएवमेकोपाध्यपगमेपितस्यैवानंतोपाधिसंबद्धत्वान्नमु
क्तिःस्यात्।उद्यतायुधदोर्दंडाःपतितस्वशिरोक्षिभिः।पश्यंतःपातयंतिस्मकबंधाअप्यरीन्युधीतिभारतवचना

न्नविश्लेषाद्विशेषः। किंचोपाधिरात्मनएकदेशंग्रसत्युतसर्वमात्मानं । एकदेशांगीकारेसावयवत्वं । सावयव
स्यचानित्यत्वंतैरंगीकृतं । सर्वग्रासेचनोपाधिर्भेदकःस्यात्। उपाधिकृतांशकल्पनेतदुपाधिकृतत्वेआत्माश्रय
त्वं। उपाध्यंतरकल्पनेऽनवस्था । नचेश्वरस्यसर्वगतत्वादौपाधिकभेदोब्रह्मणाभवति। नहिदेशतःकालतश्चाप
रिच्छिन्नयोरौपाधिकभेदोदृष्टः। सर्वोपाधिगतत्वाच्चैकस्यैवेश्वरस्यभेदस्यमिथ्यात्वाद्धस्तपादादिभेदेपिभोक्तुरे
कत्ववत्सर्वसुखदुःखादिभोक्तृत्वमीश्वरस्यैवस्यात्। देशतःकालतश्चापरिच्छिन्नयोरौपचारिकभेदाभावादेवदुः
खिनोन्यच्छुद्धंब्रह्मनसिध्यति। अतःस्वाभाविकस्संसारइत्यनिवृत्तिरेवस्यात्। किंचविशिष्टस्यशुद्धस्यवासंसा
रःशुद्धस्यसंसारइत्युक्तेस्वव्याहतिः। विशिष्टस्येत्युक्तेविशिष्टोन्यःसएववा। सएवचेदुक्तोदोषः। अन्यश्चेन्नित्यो
ऽनित्योवा । अनित्यश्चेन्नाशएवतस्यनमोक्षः। नित्यत्वेचभेदस्यसत्यत्वं मोक्षेपितस्यभावात्। स्वरूपमात्रस्या
भेदउपाधिभिन्नएवेत्यंगीकारेस्वरूपमेवोपाधिसंबद्धमितिनतस्यशुद्धत्वं । अशुद्धस्वभावस्यनकदाचिच्छुद्ध
त्वमितिचतत्पक्षः । उपाधिमिथ्यात्वांगीकारेचान्योन्याश्रयत्वादिदोषाउक्ताः । नचानादिकर्मभेदाद्भेदः ।
औपाधिकभेदसिद्धौकर्मभेदसिद्धिःतत्सिद्धौचतत्सिद्धिरित्यन्योन्याश्रयत्वात् । अतोनंतदोषदुष्टत्वाद्ग्रंथबहु

विष्णुत त्वंस्यादित्येवोपरम्यते । अतःसर्वप्रमाणविरुद्धत्वान्नाभेदेश्रुतितात्पर्यं । सर्वशब्दावाच्यलक्षणापिनदृष्टे विनि-
॥ १७ ॥ तिनतस्यशास्त्रगम्यत्वं । अतोऽवाच्यत्वादज्ञेयत्वाच्छून्यमेवतदितिप्राप्तं । नचस्वेनापिज्ञेयत्वंतैरुच्यते । क
र्तृकर्मविरोधइतिहितेवदंति । नचस्वरूपमन्यद्वाज्ञेयंज्ञातारंचविनाज्ञानंदृष्टं । अतोज्ञातृज्ञेयाभावाज्ज्ञानस्या प० २
पिशून्यतैव । अतःशून्यवादान्नकश्चिद्विशेषः । नचज्ञातृज्ञेयरहितंज्ञानंक्वापिदृष्टं । अप्राप्तत्वाच्चेश्वरभेदस्यना
भेदेश्रुतितात्पर्यंयुज्यते । सर्वोत्तमंसर्वदोषव्यपेतंगुणैरशेषैःपूर्णमन्यंसमस्तात् । वैलक्षण्याज्ज्ञापयितुंप्रवृत्ताःस
र्ववेदामुख्यतोनैवचान्यदितिमहोपनिषदि । अतःसर्वागमैरेवसर्वस्माद्भिन्नत्वेनसर्वस्माद्विशिष्टत्वेनचविज्ञेयो
भगवान्नारायणइतिसिद्धं ॥ ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीमद्विष्णुतत्त्वविनिर्णयेप्र
थमःपरिच्छेदः ॥ १ ॥ ॥ छ ॥ ॥ छ ॥ ॥ ॥

ॐ॥ब्रह्माशिवःसुराद्याश्चशरीरक्षरणात्क्षराः॥लक्ष्मीरक्षरदेहत्वादक्षरातत्परोहरिः।स्वातंत्र्यशक्तिविज्ञानसु
खाद्यैरखिलैर्गुणैः । निस्सीमत्वेनतेसर्वेतद्वशाःसर्वदैवच । सर्गस्थितिक्षययतिप्रकाशावृत्तिबंधनं । सर्वक्षरा ॥२७५॥
णामेकःसकुर्यात्सात्विकमोक्षणं । सर्गस्थितियतिज्योतिर्नित्यानंदप्रदोक्षरे । चेष्टाप्रदश्चसर्वेषामेकएवपरोह

रिः। तस्यनान्योस्तिसर्गादिकर्तानिर्दोषकश्चसइतिपरमश्रुतिः । ब्रह्मशेषसुपर्णेशशक्रसूर्यगुहादयः । सर्वेक्ष
राअक्षरातुश्रीरेकातत्परोहरिरितिस्कांदे।यंकामयेतंतमुग्रंकृणोमितंब्रह्माणंतमृषिंतंसुमेधां।अहंरुद्रायधनुरा
तनोमिब्रह्मद्विषेशरवेहंतवाउ । अहंजनायसमदंकृणोम्यहंद्यावापृथिवीआविवेश। अहंसुवेपितरमस्यमूर्धन्म
मयोनिरप्स्वं१तस्समुद्रे । यमंतःसमुद्रेकवयोवयंतियदक्षरेपरमेप्रजाः। यतःप्रसूताजगतःप्रसूतीतोयेनजीवा
न्व्यससर्जभूम्यां। यदोषधीभिःपुरुषान्पशूंश्चविवेशभूतानिचराचराणि। अतःपरंनान्यदणीयसंहिपरात्परंय
न्महतोमहांतं । यदेकमव्यक्तमनंतरूपंविश्वंपुराणंतमसःपरस्तात्। तदेवर्तंतदुसत्यमाहुस्तदेवब्रह्मपरमंकवी
नां। अस्यदेवस्यमीळ्हुषोवयाविष्णोरेषस्यप्रभृथेहविर्भिः।विदेहिरुद्रोरुद्रियंमहित्वंयासिष्टंवर्तिरश्विनाविराव
त्। चंद्रमामनसोजातश्चक्षोःसूर्योअजायत । मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजायत। एकोनारायणआसीन्न
ब्रह्मानेशानोनाग्नीषोमौनेमेद्यावापृथिवी। एकोनारायणआसीन्नब्रह्मानचशंकरः । समुनिर्भूत्वासमचिंतय
त्ततएतेव्यजायंत । विश्वोहिरण्यगर्भोग्निर्यमोवरुणरुद्रेंद्राइति । वासुदेवोवाइदमग्रआसीन्नब्रह्मानचशंकरः।
नेंद्रसूर्यौनचगुहोनसोमोनविनायकइत्यादिश्रुतिभ्यश्च। यस्मात्परंनापरमस्तिकिंचिदित्यत्राप्यपरमस्तीत्येवा

र्थः। अन्यथा तेनेदं पूर्णं ततो यदुत्तरतरं तदरूपमनामयमिति वाक्यशेषविरोधात्। तेनेदमित्युक्तमेव तत इति परा मृश्यते। अन्यथा यस्मात्परमित्युक्तिविरोधात्। नामानि सर्वाणि यमाविशंति तं वै विष्णुं परममुदाहरंति । अस्यै व सर्वनामानि व्यतिरिक्तस्य सर्वतः । यः स्वतंत्रः सदैवैकः स विष्णुः परमो मत इत्यादिश्रुतिभ्योऽन्यनामान्यस्यैवेति नान्येषां सर्वेश्वरत्वादिकमुच्यते। सर्ववेदेष्वप्यस्यादोषवचनादादावभाववचनाच्च तद्वचनाच्चान्येषां सर्वेषां वेदेषु सर्वेषु। तेषां सर्वनामत्वानुक्तेश्च। उत्पत्तिर्वासुदेवस्य प्रादुर्भावो न चापरः । देहोत्पत्तिस्तदन्येषां ब्रह्मादीनां तदी रणात् । देहो नादिर्हरेर्नित्यो ब्रह्मादीनामनित्यका। मुख्योत्पत्तिस्तदन्येषां प्रादुर्भावो हरेर्जनिरिति परमश्रुतेश्च। इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमद्विष्णुतत्त्वविनिर्णये द्वितीयः परिच्छेदः ॥ २ ॥ ७ ॥

ॐ ॥ वर्जितः सर्वदोषैर्यो गुणसर्वस्वमूर्तिमान् । स्वतंत्रो यद्वशाः सर्वे स विष्णुः परमो मत इति परमोपनिषदि । नि त्यपूर्णाखिलगुणो निर्दोषः सर्वदैव यः । यः स्वतंत्रः परो विष्णुर्जन्ममृत्यादिवर्जितः। नारद उवाच । निर्दोषश्चेत्क थं विष्णुर्मानुषेषूदपद्यत । चिंताश्रमव्रणाज्ञानदुःखयुग्दृश्यते कथं । एष मे संशयो ब्रह्मन्हृदि शल्य इवार्पितः । अ नुद्धार्योऽपरैर्मर्त्यैः सूक्तिशक्त्यात मुद्धर । ब्रह्मोवाच । स्त्रीपुंमलाभियोगात्मा देहो विष्णोर्न जायते । किंतु निर्दोष

चैतन्यसुखांनित्यांस्वकांतनुं । प्रकाशयतिसैवेयंजनिर्विष्णोर्नचापरा । तथाप्यसुरमोहायपरेषांचक्कचित्क
चित् । दुःखाज्ञानश्रमादीन्सदर्शयेच्छुद्धसद्गुणः । कव्रणादिकचाज्ञानंस्वातंत्र्यान्नित्यसद्गुणे । दौर्लभ्यायैव
मोक्षस्यदर्शयन्परमोहरिः । मिथ्यादर्शनदोषेणतेनमुक्तिंनयांतिच । तमोयांतिचतेनैवतस्माद्दोषविवर्जितं ।
प्रादुर्भावगतंचैवजानीयाद्विष्णुमंजसेतिब्रह्मांडे । गुणक्रियादयोविष्णोःस्वरूपंनान्यदिष्यते । अतोमिथो
पिभेदोनतेषांकश्चित्कदाचन । स्वरूपेपिविशेषोस्तिस्वरूपत्ववदेवतु । भेदाभावेपितेनैवव्यवहारश्चसर्वत
इतिपरमोपनिषदि । अभिन्नत्वमभेदश्चयथाभेदविवर्जितं । व्यवहार्यंपृथक्कस्यादेवमेवगुणाहरेः । अभेदा
भिन्नयोर्भेदोयदिवाभेदभिन्नयोः । अनवस्थितिरेवस्यान्नविशेषणतामतिः । मूलसंबंधमज्ञात्वातस्मादेकम
नंतधा । व्यवहार्यंविशेषेणदुस्तर्कबलतोहरेः । विशेषोपिस्वरूपंसस्वनिर्वाहकतास्यचेतिब्रह्मतर्के । एकमे
वाद्वितीयंतन्नेहनानास्तिकिंचन । मृत्योस्समृत्युमाप्नोतियइहनानेवपश्यति । यथोदकंदुर्गेवृष्टंपर्वतेषुविधा
वति । एवंधर्मान्पृथक्पश्यंस्तानेवानुविधावतीत्यादिश्रुतेश्च । देशःसर्वत्रपुरुषःस्वतंत्रःकालनित्यता । इत्या
दिषुस्वसंबंधाद्यथैवगुणरूपिणः । गुणित्वंगुणभोक्तृत्वंस्याद्विष्णोस्तच्चसस्वयमितिब्रह्मतर्के । विष्णुंसर्वगुणैः

पूर्णंज्ञात्वासंसारवर्जितः । निर्दुःखानंदभुङ्नित्यंतत्समीपेसमोदते । मुक्तानांचाश्रयोविष्णुरधिकोधिपति
स्तथा । तद्वशाएवतेसर्वेसर्वदैवसईश्वरइतिपरमश्रुतिः । अमृतस्यैषसेतुः । सोश्नुतेसर्वान्कामान्सह
ब्रह्मणाविपश्चितेत्यादिच । नृपाद्याश्शतधृत्यंतामुक्तिगाउत्तरोत्तरं । गुणैःसर्वैःशतगुणामोदंतइतिहिश्रु
तीरितिपाद्मे । अतोनिश्शेषदोषवर्जितःपूर्णानंतगुणोनारायणइतिसिद्धं ॥ यस्यत्रीण्युदितानिवेदवचने
रूपाणिदिव्यान्यलंबट्तद्दर्शतमित्थमेवनिहितंदेवस्यभर्गोमहत् । वायोरामवचोनयंप्रथमकंपृक्षोद्वितीयं
वपुर्मध्वोयत्तुतृतीयमेतदमुनाग्रंथःकृतःकेशवे ॥ स्वतंत्रायाखिलेशायनिर्दोषगुणरूपिणे । प्रेयसेमेसुपूर्णा
यनमोनारायणायते ॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचितेश्रीमद्विष्णुतत्त्वविनिर्णयेतृतीयःप
रिच्छेदः ॥ ॥ ग्रंथश्चायंसंपूर्णः ॥ ३ ॥ ॥छ॥ ॥छ॥ ॥छ॥

॥ इति श्रीमद्विष्णुतत्त्वविनिर्णयःसंपूर्णः ॥